Purport:—The whole of the present movable and immovable universe comprising the sun, moon and other planets, bears witness to the greatness of God inferred through its multifarious formations. Though continually increasing and decreasing in its form through the three stages of creation, continuous existence and dissolution, it subsists in only a quarter of God's Divine Majesty, nay, it does not come up even to that much of His greatness. Three parts of God's Omnipotence eternally exist in His imperishable beatific state, and by saying so we do not at all diminish His infinite nature, but try to depict, so to say, His infinite greatness as compared with the world and the littleness of the latter in contrast with His Infinite Majesty.

(८८) त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥ ४ ॥

पदपाठः—त्रिऽपात् ऊर्ध्वः उत् ऐत् पुरुषः पादः अस्य इह अभवत् पुनः ततः विष्वङ् वि अक्रामत् साशनानशने अभि ॥

भाष्यम्=**Explanation**:—त्रिपात्*=त्रयः पादा अंशा यस्य सः । Having three parts. ऊर्ध्वः=सर्वेभ्य उत्कृष्टः संसारात् पृथङ्मुक्ति-

---

* त्रिपात्—त्रयः पादा यस्य यस्मिन्वा सः ॥ पा० २ । २ । २४ ॥

स्वरूपः । Surpassing all, different from the cosmos and ever free in His essence. अयं पुरुषः परमेश्वरः पूर्वोक्तस्य त्रिपादोपलक्षितस्य सकाशादूर्ध्वमुपरिभागेऽर्थात्पृथग्भूतोऽस्त्येवेत्यर्थः । एकपादोपलक्षितं यत्पूर्वोक्तं जगदस्ति तस्मादपीहास्मिन्संसारे सः पुरुषः पृथगभव व्यतिरिक्त एवास्ति । स च त्रिपात्संसार एकपाच्च मिलित्वा सर्वश्चतुष्पाद्भवति । अयं सर्वः संसार इहास्मिन्परमात्मन्येव वर्तते पुनर्लयसमये तत्सामर्थ्यकारणे प्रलीनश्च भवति ॥

The purport of this stanza is that the Puruṣa (God) is above and beyond and distinct from what has been described above as the three-fourths. He is distinct and separate from this world also which has been described as the one-fourth. The three-fourths cosmos and the one-fourth together make up four portions. The whole of this universe exists in the Supreme Being and is again absorbed in the cause—His Sāmarthya—at the time of the dissolution.

तत्रापि स पुरुषोऽविद्यान्धकाराज्ञानजन्ममरणज्वरादिदुःखादूर्ध्वः परः (उदैत्) उदितः प्रकाशितो वर्तते ॥

Even then the Puruṣa shines above all, free from nescience, darkness, ignorance, birth, death, fever, disease and other suffering.

पुरुषः=पालकः=the Protector (of all). पादः=एको भागः= one part. इह=जगति=in the world or cosmos. अभवत्= भवति=is, comes into being. पुनः* पुनः=again and again. ततः=अनन्तरम्=then. विष्वङ्† =यो विषु सर्वत्राञ्चति प्राप्नोति । Who pervades all, goes everywhere. ततो विष्वङ्=ततस्तत्सामर्थ्यात्सर्वमिदं विश्वमुत्पद्यते । From that Omnipotence of His the cosmos comes into being. किञ्च तत् । What sort of cosmos is it ? साशनानशने‡=यदेकमशनेन भोजनकरणेन सह वर्तमानं

---

* पुनः—पनाय्यते स्तूयत इति √पन स्तुतौ + अर् । पृशोदरादित्वादकारस्योत्वं ॥ पा० ६ । ३ । १०९ ॥

† विष्वङ्—विषु अञ्चतीति—विषु + √अन्चु गतिपूजनयोः + क्विन् ॥ पा० ३ । २ । ५९ ॥ ६ । ४ । २४ ॥ ८ । २ । ६२ ॥

‡ साशनानशने—साशनञ्चानशनञ्च ॥ पा० २ । २ । २९ ॥ अशनेन सह साशनम् ॥ पा० २ । २ । २८ ॥ न विद्यते अशनं यस्मिँस्तदनशनं ॥ पा० २ । २ । २४ ॥ वा० नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः ॥ अशनम्—√अश भोजने + ल्युट् ॥ पा० ३ । ३ । ११७ ॥

जङ्गमं जीवचेतनादिसहितं जगत् । द्वितीयमनशनमविद्यमानमशनं भोजनं यस्मिंस्तत्पृथिव्यादिकं च यज्जडं जीवसम्बन्धरहितं जगद्वर्तते तदुभयं तस्मात्पुरुषस्य सामर्थ्यकारणादेव जायते । यतः स पुरुष एतद्द्विविधं जगद्द्विविधतया सुष्ठुरीत्या सर्वात्मतयाञ्चति तस्मात् सर्वं द्विविधं जगदुत्पाद्य (अभिव्यक्रामत्) सर्वतो व्याप्तवानस्ति ॥

The animate world, which moves and eats, i. e., the living beings endowed with life and consciousness, and the inanimate world, such as, the earth, &c., which does not eat, i. e., which is devoid of life and consciousness—both, are created with His Sāmarthya. The Puruṣa enters this two-fold world through and through in many and beautiful ways and having created the two-fold universe pervades it altogether and entirely.

अन्वयः—पूर्वोक्तस्त्रिपात्पुरुष ऊर्ध्वं उदैत । अस्य पाद इह पुनरभवत् । ततः साशनानशने अभि विष्वङ् सन् व्यक्रामत् ॥

Translation :—The tripartite Puruṣa described in the above verse, that is, God the Protector, surpassing all, existing in His beatific state is distinct from the world and rises above all in His Divine Majesty. One quarter of His Omnipotence is manifested in the universe that comes into being again and again in an ever-recurring cycle of creation and dissolution after which His Divine Immanence pervades in a special manner both animate beings consisting of organisms that subsist on food and inanimate things that do not require food.

भावार्थः—अयं परमेश्वरः कार्यजगतः पृथगंशत्रयेण प्रकाशितः सन्नेकांशस्वसामर्थ्येन सर्वं जगत्पुनः पुनरुत्पादयति पश्चात्तस्मिंश्चराचरे जगति व्याप्य तिष्ठति ॥

Purport:—This Supreme Lord being revealed by the three parts of His Majesty distinct from the created world, produces the cosmos again and again by means of the one part, namely, His Sāmarthya and thereupon pervading the movable and immovable world remains in it by His Immanence.

(८९) ततो॑ वि॒राड॑जायत वि॒राजो॒ अधि॒ पूरु॑षः । स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

पदपाठः—ततः विऽराट् अजायत विऽराजः अधि पूरुषः सः जातः अति अरिच्यत पश्चात् भूमिम् अथो पुरः ॥

भाष्यम्=Explanation:—ततो विराडजायत=ततस्तस्माद् ब्रह्माण्डशरीरः सूर्यचन्द्रनेत्रो वायुप्राणः पृथिवीपाद इत्याद्यलङ्कारलक्षणलक्षितो हि सर्वशरीराणां समष्टिदेहो विविधैः पदार्थैः राजमानः सन्विराडजायतोत्पन्नोऽस्ति ॥

From Him was produced Virāṭ—the shining one—the body of all the bodies taken together collectively, resplendent with various objects, which is metaphorically described as one whose body is the universe, whose eyes are the sun and the moon, whose breath is the wind, and whose feet are the earth.

विराजो* अधि पूरुषः=तस्माद्विराजोऽध्युपरि पश्चाद्ब्रह्माण्डतत्त्वावयवैः पुरुषः सर्वप्राणिनां जीवाधिकरणो देहः पृथक्पृथगजायतोत्पन्नोऽभूत् ॥

After Virāṭ were formed the special bodies of all living beings from the elements of the universe.

स जातो अत्यरिच्यत=स देहो ब्रह्माण्डावयवैरेव वर्धते नष्टः संस्तस्मिन्नेव प्रलीयत इति परमेश्वरस्तु सर्वेभ्यो भूतेभ्योऽत्यरिच्यतातिरिक्तः पृथग्भूतोऽस्ति ॥

These bodies derive growth from the elements and after death return to and are absorbed into them. God, however, remains distinct from all created beings.

पश्चाद्भूमिमथो† पुरः=पूर्वं भूमिमुत्पाद्य धारितवांस्ततः पुरुषस्य सामर्थ्यात्स जीवोपि देहं धारितवानस्ति । स च पुरुषः परमात्मा ततस्तस्माज्जीवादप्यत्यरिच्यत पृथग्भूतोस्ति ॥

He first created the earth and gave it support and then the jīvas (souls), through His might, have supported their corporeal frames on it. The Puruṣa the Supreme Being, is distinct from the jīva also.

अन्वयः—हे मनुष्यास्ततो विराडजायत विराजो अधि पुरुष अथो स पुरो जातोऽत्यरिच्यत पश्चाद्भूमिं जनयति तं विजानीत ॥

Translation:—From the Supreme Being (as the efficient cause) comes into being the entire cosmos

---

* विराट्—वि + √राज् दीप्तौ + क्विप् ॥ पा० ३ । २ । १७८ ॥

† पश्चात्—अपर + आत् ॥ पा० ५ । ३२ ॥

beaming with objects indefinite in variety and number which He then controls after creation. Being already manifest by His Omnipotence and distinct from the universe He now fashions the earth. Oh men! You should realise Him.

भावार्थः—परमेश्वरादेव सर्वं समष्टिरूपं जगज्जायते स च तस्मात्पृथग्भूतो व्याप्तोऽपि तत्कल्मषालिप्तोऽस्य सर्वस्याधिष्ठाता भवति । एवं सामान्येन जगन्निर्माणमुक्त्वा विशेषतया भूम्यादिनिर्माणं क्रमेणोच्यते ॥

Purport:—The whole universe as an aggregate originates from the Supreme Lord alone Who, distinct as He is from the former, is not soiled with any of its blemishes though pervading it and, thus does He control it.

Having thus, in general terms, described the creation of the universe, the Veda does now, in a special manner, relate the creation of the earth and other objects in order.

(९०) तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥

पदपाठः—तस्मात् यज्ञात् सर्वऽहुतः सम्ऽभृतम् पृषत्ऽआज्यम् पशून तान् चक्रे वायव्यान् आरण्याः ग्राम्याः च ये ॥

भाष्यम्=**Explanation**:—तस्मात्=पूर्वोक्तात्=(from the Puruṣa) described above. यज्ञात्=सच्चिदानन्दादिलक्षणात्पूर्णात्= the perfect one as distinguished by the attributes existence, intelligence and bliss. सर्वहुतः*=सर्वहुतात्, सर्वपूज्यात्सर्वोपास्यात्सर्वशक्तिमतः (परब्रह्मणः)=(From the Parabrahman) the Almighty one that is acceptable to all or, worshipped and adored by all. (सर्वैर्हूयत आदीयत इति सर्वहुतः) संभृतं† पृषदाज्यम्‡=पृषु सेचने धातुः । पर्षन्ति सिञ्चन्ति क्षुन्निवृत्यादि

* सर्वहुत—सर्व + √हु दानादनयोः । आदाने चेत्येके । + क्त ॥ पा० ३।२।१०२॥

† सम्भृतम्—सम् + √भृञ् भरणे + क्त ॥ पा० ३ । २ । १०२ ॥

‡ पृषदाज्यम्—पृषच्चाज्यञ्च पृषदाज्यम् ॥ पा० २ । ४ । ६ ॥ पृषत्—√पृष सेचने + अति ॥ उ० २ । ८४ ॥ आज्यम्—√अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु + क्यप् ॥ वा० अञ्जेश्चोपसंख्यानं संज्ञायाम् ॥

=पृषु सेचने धातुः । पर्षन्ति सिञ्चन्ति क्षुन्निवृत्त्यादिकारकमन्नादि वस्तु यस्मिंस्तत्पृषत् । आज्यं घृतं मधु दुग्धादिकं च । पृषदिति भक्ष्यान्नोपलक्षणम् । आज्यमिति व्यञ्जनोपलक्षणम् । यावद्वस्तु जगति वर्तते तावत्सर्वं पुरुषात्परमेश्वरसामर्थ्यादेव जातमिति बोध्यम् । तत्सर्वमीश्वरेण स्वल्पं स्वल्पं जीवैश्च सम्यग्धारितमस्ति । अतः सर्वैरनन्यचित्तेनायं परमेश्वर एवोपास्यो नान्यश्चेति ॥

The word pṛṣat in the text comes from the root pṛṣu to moisten or pour and hence it means that by which food, &c., that pacifies hunger, is moistened. Ājyam means ghee, honey, milk &c. Pṛṣat stands for food which is masticated and ājyam for that which is eaten without mastication. All the objects found in the universe were created by God's Sāmarthya and by Him they are upheld, although to some slight extent the jivas (individual souls) also uphold and maintain them. All should, therefore, worship God alone and none else with an undivided mind.

पशूंस्तांश्चक्रे‡ य आरण्या वनस्थाः पशवो* ये च ग्राम्याः$ ग्रामस्थास्तान्सर्वान्स एव चक्रे कृतवानस्ति । स च परमेश्वरो वायव्यान्† वायुसहचरितान्पक्षिणश्चक्रे चकार । मीनादीनन्यान्सूक्ष्मदेहधारिणः कीटपतङ्गादीनपि कृतवानस्ति ॥

He alone made the beasts of the forest and the animals that live in towns. God alone made the birds of the air and the small living creatures, such as, insects, &c. The conjunction 'ca' (and) implies fish insects, moths &c.

(सम्भृतम्—सम्यक्सिक्तं जातम् । वायव्यान्—वायुवद्गुणान् । आरण्याः—अरण्ये भवाः सिंहादयः । ग्राम्याः—ग्रामे भवा गवादयः ।)

अन्वयः—हे मनुष्यास्तस्मात्सर्वहुतो यज्ञात्सर्वं पृषदाज्यं सम्भृतं य आरण्या ग्राम्याश्च तान्वायव्यान्पशून्यश्चक्रे तं विजानीत ॥

Translation:—From that Supreme Being acknowledged and adored by all, all objects of enjoyment

---

* पशून्—√दृशिर् प्रेक्षणे+कु ॥ उ० १ । २७ ॥ पा० ७ । ३ । ७८ ॥

† वायव्यान्—वायु+यत् ॥ पा० ४ । २ । ३१ ॥

‡ आरण्याः—अरण्य+अण् ॥ वा० अरण्याण्णः ॥ अरण्यम्—√ऋ गतौ+अन्य ॥ उ० ३ । १०२ ॥ अथवा नञ्+√रमु क्रीडायाम्+यत् ॥ उ० ४ । ११२ ॥

$ ग्राम्याः—ग्राम+य ॥ पा० ४ । २ । ९४ ॥ ग्रामः—√ग्रस भक्षे+मन् ॥ उ० १ । १३९ ॥ १४३ ॥

such as food to be masticated and that which is used to season such food are produced well formed. From Him also come into being sylvan beasts like the lion and domestic animals like the cow, birds of the air (fish and all small living creatures such as insects &c.). Oh men ! you should know Him.

भावार्थः—येन सर्वैर्ग्रहीतव्येन पूज्येन जगदीश्वरेण सर्वजगद्धिताय पृषदादि भोग्यं वस्तु ग्रामस्था वनस्था वायव्याश्च पशव अन्ये मीनकीटादयश्च निर्मितास्तं सर्वं उपासीरन् ॥

Purport:—All should adore that Lord of the universe alone who is acknowledged by all and by Whom are created all enjoyable objects as curds &c., all domestic animals, wild beasts, birds of the air, fish and insects &c.

(९१) तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥

पदपाठः—तस्मात् यज्ञात् सर्वऽहुतः ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्मात् यजुः तस्मात् अजायत ॥

भाष्यम् = **Explanation**:—तस्माद्यज्ञात्सर्वहुतः=तस्माद्यज्ञात्सच्चिदानन्दादिलक्षणात्पूर्णात्पुरुषात्सर्वहुतात्सर्वपूज्यात्सर्वोपास्यात्सर्वशक्तिमतः परब्रह्मणः । ऋचः*=ऋग्वेदः । यजुः$=यजुर्वेदः । सामानि†=सामवेदः । छन्दाँसि‡=अथर्ववेदश्च । जज्ञिरे=चत्वारो वेदास्तेनैव प्रकाशिता इति वेद्यम् ।

The Ṛgvēda, the Yajurvēda the Sāmavēda and the Atharvavēda were produced by the Supreme and perfect Being, Para-brahman who possesses the attributes of self-existence, consciousness and bliss, Who is Omnipotent and universally adored. The meaning is that the four Vedas were revealed by God Himself.

---

* ऋचन्ति स्तुवन्ति यया सा ऋच्—√ऋच् स्तुतौ + क्विप् ॥ उ० २ । ५७ ॥

† सामानि—√षो नाशे + मनिन् ॥ उ० ४ । १५३ ॥

‡ छन्दांसि—√चदि आह्लादने + असुन् ॥ ४ । १८९ ॥ २१९ ॥ छन्दत्यर्चतिकर्मेति निघंटौ ॥ ३ । १४ ॥ छन्दांसि छादनादिति निरुक्ते ॥ ७ । १२ ॥

$ यजुः—√यज देवपूजासंगतिकरणदानेषु + उसि ॥ उ० २ । ११५ ॥

सर्वहुत इति वेदानामपि विशेषणं भवितुमर्हति वेदाः सर्वहुताः । यतः सर्वमनुष्यैर्होतुमादातुं ग्रहीतुं योग्याः सन्त्यतः ।

The word sarvahutah should also be taken as an adjective denoting an attribute of the Vedas because they also are worthy of acceptance by all.

जज्ञिर अजायतेति क्रियाद्वयं वेदानामनेकविद्यावत्त्वद्योतनार्थम् । तथा तस्मादिति पदद्वयमीश्वरादेव वेदा जाता इत्यवधारणार्थम् । वेदानां गायत्र्यादिच्छन्दोन्वितत्वात्पुनश्छन्दांसीतिपदं चतुर्थस्याथर्ववेदस्योत्पत्तिं ज्ञापयतीत्यवधेयम् । यज्ञो वै विष्णुः । शतपथ १ । १ । २ । १३ । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । यजुर्वेद ५ । १५ । इति सर्वजगत्कर्तृत्वं विष्णौ परमेश्वर एव घटते नान्यत्र । वेवेष्टि व्याप्नोति चराचरं जगत्स विष्णुः परमेश्वरः ॥

The two words jajñirē and ajāyata both meaning 'produced' are used to show that the Vedas teach numerous sciences. Similarly the pronoun tasmāt (from Him) is used twice for the purpose of laying stress on the fact that God alone is the Author of the Vedas. The Vedas contain various metres—Gāyatrī &c., but not withstanding this, the word chandāṃsi (metres)—is used to indicate that the Atharvavēda also was revealed by God. The word 'Yajña' means 'Viṣṇu' according to Śatap. Br. I, 1, 2, 13 where it is said 'verily Viṣṇu is Yajña.' Now Viṣṇu means God according to Yajurvēda V, 15. The attributes of creating the universe can be applicable to God alone. He is called Viṣṇu because He pervades the animate and the inanimate world.

अन्वयः—हे मनुष्यास्तस्माद्यज्ञात्सर्वहुतः परमात्मनः ऋचः सामानि जज्ञिरे तस्माच्छन्दांसि जज्ञिरे तस्माद्यजुरजायत । युष्माभिः स विज्ञातव्यः ॥

Translation:—Oh men! from the universally Supreme Lord the All-pervading, were produced the Ṛks and the Sāmans, from Him was produced the Atharvavēda and from Him was the Yajurvēda produced. You should know him.

भावार्थः—हे मनुष्या भवन्तो यस्मात्सर्वे वेदा जायन्ते तं परमात्मानमुपासीरन्वेदांश्चाधीयीरंस्तदाज्ञानुकूलं च वर्तित्वा सुखिनो भवन्तु ॥

Purport:—Oh men! You ought to adore that Supreme Being from Whom all the Vedas originate, study the Vedas, act in accordance with His commandments and thus be happy.

(९२) तस्मादश्वा॑ अजायन्त ये के चो॑भयाद॑तः ।

गावो॑ ह जज्ञिरे तस्मात्तस्मा॑ज्जाता अ॑जावयः॑ ॥८॥

पदपाठः—तस्मा॑त् अश्वाः॑ अजायन्त ये के च उभय॒ऽद॑तः गावः॑ ह जज्ञिरे तस्मा॑त् तस्मा॑त् जाताः अजावयः॑ ॥

भाष्यम्=**Explanation** :—तस्मादश्वा०=तस्मात्परमेश्वरसामर्थ्यादेवाश्वास्तुरङ्गा अजायन्त । ग्राम्यारण्यपशूनां मध्येऽश्वादीनामन्तर्भावादेषामुत्तमगुणवत्त्वप्रकाशनार्थोऽयमारम्भः ॥

Horses were produced through the Sāmarthya (might) of the Puruṣa—the Supreme Lord. Although horses &c. are included among 'beasts of the forest' and 'domestic animals' mentioned in one of the foregoing verses, they are again mentioned here in order to emphasize their good qualities.

ये के चोभयादतः*=उभयतो दन्ता येषां त उभयादतः । ये केचिदुभयादत उष्ट्रगर्दभादयस्तेऽप्यजायन्त ॥

(From Him) also were produced animals having two rows of teeth, such as camels, asses &c.

गावो ह जज्ञिरे तस्मात्=तथा तस्मात्पुरुषसामर्थ्यादेव गावो धेनवः किरणाश्चेन्द्रियाणि च जज्ञिरे जातानि ॥

From the might of the Puruṣa were produced cows, the rays of light and the sense organs.

तस्माज्जाता अजावयः†=एवमेव चाजाश्छागा अवयश्च जाता उत्पन्ना इति विज्ञेयम् ॥

---

* उभयादतः—उभयतो दन्ता येषान्ते ॥ पा० ५ । ४ । १४२॥ ६ । ३ । १३७॥ दन्तः—√दमु उपशमे+तन् ॥ उ० ३ । ८६ ॥

† अजाश्चावयश्च ॥पा० २ । २ । २९ ॥ अजा—अजति गच्छतीति √अज गतिक्षेपणयोः+अच्+टाप् ॥ पा० ३ । १ । १३४ ॥ ४ । १ । ४ ॥ अविः—अवति दुग्धादिप्रदानेन रक्षतीति √अव रक्षणगत्यादिषु+इन् ॥ उ० ४ । ११८ ॥

It should be understood that in like manner were produced goats and sheep.

अन्वयः—हे मनुष्या युष्माकमश्वा ये के चोभयादतः सन्ति ते तस्मादजायन्त । तस्माद्गावो ह जज्ञिरे तस्मादजावयो जाता इति वेद्यम् ॥

Translation:—Oh men! your horses and such other animals of yours as have two rows of teeth, were producod from that Supreme Being as the efficient cause. It should also be understood that cows, goats and sheep also were produced from Him.

भावार्थः – हे मनुष्या यूयं गवाश्वादयो ग्राम्याः सर्वे पशवो यस्मात्सनातनात्पूर्णात्पुरुषादेवोत्पन्नास्तस्याज्ञोल्लङ्घनं कदापि मा कुरुत ॥

Purport:—Oh men! you should never transgress the commandments of that Eternal and Perfect Puruṣa (God) from Whom all domestic animals such as cows, horses &c. have come into being.

(९३) तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥९॥

पदपाठः—तम् यज्ञम् बर्हिषि प्र औक्षन् पुरुषम् जातम् अग्रतः तेन देवाः अयजन्त साध्याः ऋषयः च ये ॥

भाष्यम्=**Explanation**:—(तं यज्ञं बर्हिषि०)=यमग्रतः सृष्टेः प्राग्जातं प्रादुर्भूतं जगत्कर्तारम् पुरुषं पूर्णं यज्ञं सर्वपूज्यं बर्हिषि* मानसे ज्ञानयज्ञे हृदयान्तरिक्षे वा प्रौक्षन्प्रकृष्टतया यस्यैवाभिषेकं कृतवन्तः कुर्वन्ति करिष्यन्ति चेत्युपदिश्यत ईश्वरेण (तेन देवा०)=तेन परमेश्वरेण पुरुषेण वेदद्वारोपदिष्टास्ते सर्वे देवा विद्वांसः साध्या† ज्ञानिन ऋषयो मन्त्रद्रष्टारश्च ये चान्ये मनुष्यास्तं परमेश्वरमयजन्तापूजयन्त । अनेन किं सिद्धं सर्वे मनुष्याः परमेश्वरस्य स्तुतिप्रार्थनोपासनापुरःसरमेव सर्वकर्मानुष्ठानं कुर्युरित्यर्थः ॥

The learned, the sages, the seers of the Vedic verses and all other men receiving instruction from the Puruṣa (God) through the Vedas worshipped Him (in the past, do worship Him now and shall worship Him in the future) and adore Him in spirit and mind or place Him exalted above all in the space (temple)

---

* बर्हिषि—√बृह √बृहि वृद्धौ+इसि ॥ उ० २ । १०९ ॥ आकाशम् हृदयाकाशम् वा ॥

† साध्याः—साध्यं येषामस्तीति साध्यस्ते—साध्य+अच् ॥ पा० ५ । २ । १२७ ॥

of their heart—yea, Him, the Puruṣa, the perfect Being, manifest from all times, the maker of the universe, the adorable. The instruction conveyed by this verse is that all men should commence all works and undertakings with praise, prayer and worship of God.

अन्वयः—हे मनुष्या ये देवा साध्या ऋषयश्च यमग्रतो जातं यज्ञं पुरुषं बर्हिषि प्रौक्षंस्त एव तेनायजन्त च तं यूयं विजानीत ॥

Translation:—Oh men! you should realise that Lord God, the perfect and adorable Who manifested Himself even before the creation and Whom the learned, the sages and the seers of the Vedic law have in all ages worshipped according to His divine instruction and installed exalted high above all on the throne of their heart.

भावार्थः—विद्वद्भिर्मनुष्यैः सृष्टिकर्तेश्वरो योगाभ्यासादिना सदा हृदयान्तरिक्षे ध्यातव्यः पूजनीयश्च ॥

Purport:—The learned should undergo the yogic spiritual discipline and always adore God the Creator of the cosmos in spirit and mind and meditate upon Him.

(९४) यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत्किम्बाहू किमूरू पादा उच्येते ॥१०॥

पदपाठः—यत् पुरुषम् वि अदधुः कतिधा वि अकल्पयन् मुखम् किम् अस्य आसीत् किम् बाहू किम् उरू पादौ उच्येते ॥

भाष्यम्=**Explanation**:—यत्=यम्=whom. एतं पूर्वोक्तलक्षणं पुरुषं=परमेश्वरं=the Puruṣa described already is called the Supreme Lord. कतिधा*=कियत्प्रकारैः=in how many ways. व्यकल्पयन्=तस्य सामर्थ्यगुणकल्पनं कुर्वन्तीत्यर्थः=they explain the multifarious powers of God.

व्यदधुः=तं सर्वशक्तिमन्तमीश्वरं विविधसामर्थ्यकथनेनादधुरर्थादनेकविधं तस्य व्याख्यानं कृतवन्तः कुर्वन्ति करिष्यन्ति च ॥

---

* कतिधा—कति+धा ॥ पा० ५ । ३ । ४२ ॥

They postulate Almighty God as distinguished by various powers, that is, they taught, are teaching and will teach about God in various ways as an Almighty Being having multifarious potencies.

अस्य=पुरुषस्य=by this Puruṣa. **मुखं*=मुख्यगुणेभ्यः किमुत्पन्नमासीत्**=mouth that is what is produced with superior qualities. **किं बाहू†=बलवीर्यादिगुणेभ्यः किमुत्पन्नमासीत्**=what are the two arms, that is what is produced by God with qualities like power, valour &c. ? **किमूरू‡=व्यापारादिमध्यमगुणैः किमुत्पन्नमासीत्**=what is produced by Him as possessing middling qualities like business instincts &c. ? **पादा उच्येते=पादावर्थान्मूर्खत्वादि नीचगुणैः किमुत्पन्नं वर्तते**=what is created by Him with such low qualities as lack of intelligence &c. ? **अस्योत्तरमाह**=the answer to these questions is given in the following verse.

अन्वयः—हे विद्वांसो भवन्तं यद्यं पुरुषं व्यदधुस्तं कतिधा व्यकल्पयन्नस्य सृष्टौ मुखं किमासीद्बाहू किमुच्येते ऊरूपादौ च किमुच्येते ॥

Translation:—Oh learned men ! in how many ways do you describe the might of Him whom you postulate to be the Puruṣa (God) ? Who in His creation occupy the place of the face, that is, are created by Him with the highest qualities ? Who take the place of the arms that is are endowed with such qualities as strength, valour &c, ? Who hold the position of the thighs, that is, possess such middling qualities as business-instinct &c. ? and finally, who occupy the position of the feet or possess the lowest qualities viz., lack of understanding &c. ?

भावार्थः—हे विद्वांसोऽत्र संसारेऽसंख्यं सामर्थ्यमीश्वरस्यास्ति तत्र समुदाये मुखमुत्तमाङ्गं बाह्वादीनि चाङ्गानि कानि सन्तीति ब्रूत ॥

Purport:—Oh wise men ! in this world innumerable features of the Omnipotence of God are seen. Please say which in this aggregate are equal to the face or are the best and what are like the arms or are the integral parts.

---

* मुखम्—खनत्यन्नादिकमनेनेति √खनु अवदारणे + अच् ॥ उ० ५ । १६ । २० ॥

† बाहू—बाध्यन्ते विलोड्यन्ते पदार्था अनेनेति बाहुस्तौ—√बाधृ बिलोडने + कु ॥ उ० १ । २७ ॥

‡ ऊरू—ऊर्णोत्याच्छादयति या सा—√ऊर्णु आच्छादने + कु ॥ उ० १ । २२ ॥ ३० ॥

(९५) ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥११॥

पदपाठः—ब्राह्मणः अस्य मुखम् आसीत् बाहू राजन्यः कृतः ऊरू तत् अस्य यत् वैश्यः पत्ऽभ्याम् शूद्रः अजायत ॥

भाष्यम्=Explanation:—ब्राह्मणोऽस्य मुखमासीत्=अस्य पुरुषस्य मुखं ये विद्यादयो मुख्यगुणाः सत्यभाषणोपदेशादीनि कर्माणि च सन्ति तेभ्यो ब्राह्मण‡ आसीदुत्पन्नो भवति ॥

The Brāhmaṇa is said to be produced from the mouth of the Puruṣa, that is, endowed with the best qualities such as, knowledge &c., and with capability for such acts as truthful speech and the vocation of a teacher and preacher.

बाहूराजन्यः* कृतः=बलवीर्यादिलक्षणान्वितो राजन्यः क्षत्रियस्तेन कृत आज्ञप्त आसीदुत्पन्नो भवति ॥

He made the Kṣatriya (the governing or warrior class) and ordained him to possess the qualities of strength, valour, &c.

ऊरू तदस्य यद्वैश्यः†=कृषिव्यापारादयो गुणा मध्यमास्तेभ्यो वैश्यो वणिग्जनोऽस्य पुरुषस्योपदेशादुत्पन्नो भवतीति वेद्यम् ॥

---

‡ ब्राह्मणः—ब्रह्म वेदः परमेश्वरो वा । तं जानातीति—ब्रह्मन्+अण् ॥ पा० ४ । २ । ५९ ॥

* राजन्यः—√राजृ दीप्तावैश्वर्ये च+अन्य ॥ उ० ३ । १०० ॥

† वैश्यः—विड्भ्यः प्रजाभ्यो मनुष्येभ्यो वा हितः—√विश प्रवेशने+क्विप्+ष्यञ् ॥ पा० ३ । २ । १७८ ॥ ५ । १ । ५ ॥ If the termination ष्यञ् is added in the sense of स्वार्थ, i. e., in the original sense of the word itself according to the Vartika चतुर्वर्णादीनां स्वार्थ उपसंख्यानम्, the form वैश्य would simply mean "a common subject" or "a member of the general public" and not one given to the advancement of nation-building professions such as trade and agriculture which is the sense required in the stanza. Besides विश् does not belong to the चतुर्वर्णादि group which is not an आकृतिगण. Nor can it be applied by the aphorism गुणवचनब्राह्मणादिभ्यः कर्मणि च P. V, 1, 124 since then it would denote only a quality, state or action, e. g., विशः गुणः भावः

The qualities of agriculture, trade and commerce are of the middling order. The vāiśya or the trader was produced with these qualities by God's command.

पद्भ्यां शूद्रो‡ अजायत=पद्भ्यां पादेन्द्रियनीचत्वमर्थाज्जडबुद्धित्वादिगुणेभ्यः शूद्रः सेवागुणविशिष्टः पराधीनतया प्रवर्तमानोऽजायत जायत इति वेद्यम् ॥

कर्म वा विश्+ष्यञ् वैश्यम् and the form would be a neuter abstract noun. But to the form thus evolved the aphorism अर्श आदिभ्योऽच् P. V, 2, 127 can be applied, e. g., विश्+ष्यञ्=वैश्यम् ; वैश्यम् अस्य विद्यते इति वैश्य+अच्=वैश्यः. But this form is futile since it does not give the sense required. Therefore the only course left is to apply the aphorism तस्मै हितम् P. V, 1, 5.

‡ शूद्रः—शोचनीयः—√शुच शोके+रक् ॥ उ० २ । १६ ॥ This means 'one who ought to be pitied' or 'who is in a miserable state.' It cannot be said a sweeper, or a cook is in 'a pitiable state.' Bhartṛhari says:—निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो लक्षेशः क्षितिराजतां क्षितिपतिश्चक्रेशतां वाञ्छति । चक्रेशः सुरराजतां सुरपतिर्ब्रह्मास्पदं वाञ्छति ब्रह्मा विष्णुपदं हरिः शिवपदं तृष्णावधिं को गतः ॥ According to this dictum everyone is comparatively miserable. The preceding chapter on Charity ought to be consulted in this connection. This derivation seems to draw attention to the fact that there are always bound to be in human society, for its own good such people as, by their daily life or work, seem unfit or social intercourse, and that they ought to be pitied and treated with kindness and not scorn. The word can be derived from √ईशुचिर पूतीभावे in the sense of the agent, i. e., 'who cleans or purifies' and in this sense sublimated would mean God Himself, In Kannaḍa the word 'holeya' means 'holasu tegeyuvavanu'= one who removes dirt. The Holeyas are considered to be the lowest 'caste' in Coorg and some other parts of Southern India. The Tamilians have a curious legend (perhaps not yet committed to writing) about the word शूद्र. They say that when the Āryans first invaded the Tamil country they tumbled upon the Tamil Sūtra Literature, e. g., the Agastiyam (now unavailable), and the Tolkāppiyam—both ancient Tamil grammars written in Sūtra style—and such other

The Sūdra, whose differentiating attribute is the service of and dependence on others, was produced with qualities of the lowest order, like feet occupying the lowest place in the body, such as, dulness of intellect &c.

छन्दसि लुङ् लङ् लिटः । अष्टाध्यायी ३ । ४ । ६ । इति सूत्रेण सामान्यकाले त्रयो लकारा विधीयन्ते ।

In this verse the past tense denotes all the tenses because according to the grammatical rule, P. III, 4, 6, in the Vedas, all the tenses, present, past and future, are used interchangeably.

अन्वयः—हे जिज्ञासवो यूयमस्य सृष्टौ ब्राह्मणो मुखमासीद्बाहू राजन्यः कृतो यदूरू तदस्य वैश्य आसीत्पद्भ्यां शूद्रोऽजायतेत्युत्तराणि यथाक्रमं विजानीत ॥

Translation:—Oh you who are desirous to learn ! know that in creation (that is, of the Virāt-puruṣa, the body of all the bodies, mentioned in verse five above) the Brāhmaṇa (the man knowing God and given to teaching and preaching) occupies the position of the face, that is, being created with the best and the highest qualities of head and heart he is highest in the social scale (according to God's dispensation). The next in order (you should know) is the Kṣatriya (or the governing and warrior class) who can be said to be the arms of this Puruṣa, created as he is, with such qualities as strength, valour &c. The agricultural and commercial class endowed with qualities necessary for farming, business &c., occupying the middlemost position in the scale of human society can be compared to

---

works which they could not understand and to decipher which they had to resort to Tamil scholars. Hence the Aryans began to call the Tamils 'Sūtra' which word in course of time became शूद्र. It is true fragments of the Agustiyam still available, the wonderful Tolkāppiyam, the Kannaḍa शब्दमणिदर्पण, शब्दानुशासन and कर्णाटकभाषाभूषण (a Sanskrit work), the Simhalese Sidatsāra-sangarāva are all in Sūtra style. But Sanskrit Sūtra literature is much older. Besides Tolkāppiyar, the author of Tolkāppiyam is reputed to be a direct pupil of Pāṇini. Thus between सूत्र and शूद्र there seems to be no connection.

the thighs of this Virāt-puruṣa. Finally the Sūdra occupies the position of His feet being lowest in the social scale on account of such qualities as lack of intelligence &c. These are the answers to the questions put in the above verse.

भावार्थः—ये विद्याशमदमादिषूत्तमेषु गुणेषु मुखमिवोत्तमास्ते ब्राह्मणाः। येऽधिकवीर्या बाहुवत्कार्यसाधकास्ते क्षत्रियाः। ये व्यवहारविद्याकुशलास्ते वैश्या ये च सेवायां साधवो विद्याहीनाः पादाविव मूर्खत्वादिनीचगुणयुक्तास्ते शूद्राः कार्या मन्तव्याश्च ॥

Purport:—The Brāhmaṇas are those who are exalted like the face in the possession of such superior qualities as learning, peacefulness of disposition and control of the senses. Those who possess more of strength and valour and take an active part in the accomplishment of any task like the arms of a man, are the Kṣatriyas. Those who are proficient in the knowledge of business are the Vāiśyas while those who are void of learning and are distinguished by such qualities as dulness &c., but are capable of serving others should be understood to be the Śūdras and utilised as such.

(९६) चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥

पदपाठः—चन्द्रमाः मनसः जातः चक्षोः सूर्यः अजायत श्रोत्रात् वायुः च प्राणः च मुखात् अग्निः अजायत ॥

भाष्यम्=**Explanation**:—चन्द्रमा* मनसो जातः=तस्यास्य पुरुषस्य मनसो मननशीलात्सामर्थ्याच्चन्द्रमा जात उत्पन्नोऽस्ति ॥

The moon was produced from the mind, that is, the reflective element of the Sāmarthya of this Puruṣa.

चक्षोः† सूर्यो अजायत=तथा चक्षोर्ज्योतिर्मयात्सूर्यो अजायत उत्पन्नोऽस्ति ॥

---

* चन्द्रमाः—√चदि आनन्दे+रक् ॥ उ० २। १३ ॥ चन्द्रम् आनन्दम् मिमीते असौ इति चन्द्र+म+असि ॥ उ० ४। २२३ ॥ २२८ ॥

† चक्षुः—√चक्षिङ् दर्शने+उसि ॥ उ० २। ११९ ॥

The sun was produced from the eyes, that is, the refulgent portion (of this Virāt-puruṣa).

श्रोत्रा*द्वायुश्चप्राण†श्च=श्रोत्राकाशमयादाकाशो नभ उत्पन्नमस्ति। वायुमयाद्वायुरुत्पन्नोऽस्ति प्राणश्च सर्वेन्द्रियाणि चोत्पन्नानि सन्ति ॥

The sky was produced from the ears, that is, the ākāśiya portion; the atmosphere was produced from the atmospheric portion and also, were produced the vital air and all the sense organs.

मुखान्मुख्यज्योतिर्मयादग्निरजायतोत्पन्नोऽस्ति ॥

Fire was produced from the mouth, i.e., the chief refulgent portion.

अन्वयः—हे मनुष्या अस्य ब्रह्मणः पुरुषस्य मनसश्चन्द्रमा जातश्चक्षोः सूर्योऽजायत श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायतेति बुध्यध्वम् ॥

Translation:—Oh men ! You should understand that the moon has originated from the mind or the reflective element of this Supreme Being or the Puruṣa, the sun has been produced from His eyes or the refulgent element; the sky (ether) from His ear or etheric aspect, the atmosphere, the vital air (and the sense organs) from His atmospheric aspect and from His principal refulgent aspect fire has been produced.

भावार्थः—यदिदं सर्वं जगत्कारणादीश्वरेणोत्पादितं वर्तते तत्र चन्द्रलोको मनःस्वरूपः सूर्यश्चक्षुःस्थानी वायुः प्राणश्च श्रोत्रवन्मुखमिवाग्निर्लोमवदोषधिवनस्पतयो नाडीवन्नद्योऽस्थिवत्पर्वतादिर्वर्तत इति वेदितव्यम् ॥

Purport:—In the cosmos that has been created by God from the causal element, it should be understood that the moon is of the essence of the mind, the sun is in the place of the eyes, the atmosphere and the vital air are like the ears, the fire is like the mouth, trees and plants like the hair, rivers like the blood-vessels and mountains like the bones and so on.

---

* श्रोतम्—√श्रु श्रवणे+त्रन् ॥ उ० ४ । १६८ ॥

† प्राण:—प्र+√अन प्राणने+अच् घञ् वा ॥

(९७) नाभ्या॑ आसीद॒न्तरि॑क्ष॒ꣳ शी॒र्ष्णो द्यौः सम॑वर्तत । प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा॒त्तथा॑ लो॒काँ२ ॥ अकल्पयन् ॥१३॥

पदपाठः—नाभ्याः आसीत् अन्तरिक्षम् शीर्ष्णः द्यौः सम् अवर्तत पत्ऽभ्याम् भूमिः दिशः श्रोत्रात् तथा लोकान् अकल्पयन् ॥

भाष्यम्=**Explanation**:—नाभ्या* आसीदन्तरिक्षम्†=अस्य पुरुषस्य नाभ्या अवकाशमयात्सामर्थ्यादन्तरिक्षमुत्पन्नमासीत् ॥

The inter-stellar space or intermediate region was produced from the navel, i. e., the power of fixing spatial relations of this Puruṣa.

शीर्ष्णो‡ द्यौः समवर्तत=एवं शीर्ष्णः शिरोवदुत्तमसामर्थ्यात्प्रकाशमयाद्द्यौः§ सूर्यादिलोकः प्रकाशात्मकः समवर्तत सम्यगुत्पन्नः सन्वर्तते ।

The sun &c., were produced from the head, that is, the highest portion of the Sāmarthya which occupies a place of eminence like the head

पद्भ्यां भूमिः=पृथिवीकारणमयात्सामर्थ्यात्परमेश्वरेण भूमिर्धरणिरुत्पादितास्ति जलं च ॥

God made the earth and waters from the feet, i. e., the terrestrial elements of the Sāmarthya.

दिशः* श्रोत्रात्†=शब्दाकाशकारणमयात्तेन दिश उत्पादिताः सन्ति ॥

From the ears, that is, the aural (ākāśīya) elements He produced the directions.

लोकाँ२ ॥ अकल्पयन्=तथा तेनैव प्रकारेण सर्वलोककारणमयात्सामर्थ्यादन्यान्सर्वाँल्लोकांस्तत्रस्थान्स्थावरजङ्गमपदार्थानकल्पयत्परमेश्वर उत्पादितवानस्ति ॥

In like manner God produced all the spheres and the animate and inanimate objects contained therein from the respective elements of His Sāmarthya.

---

* नाभिः—√णह बन्धने+इञ् ॥ उ० ४ । १२५ ॥ १२६ ॥

† अन्तरिक्षम्—see p. 102.

‡ शीर्ष्ण—see footnote* p. 254

§ द्यौः—√द्युत दीप्तौ+डो ॥ उ० २ । ६७ ॥

अन्वयः—हे मनुष्या यथाऽस्य नाभ्या अन्तरिक्षमासीच्छीर्ष्णो द्यौः पद्भ्यां भूमिः समवर्तत श्रोत्राद्दिशोऽकल्पयँस्तथाऽन्याँल्लोकानुत्पन्नान्वि जानीत ॥

Translation:—Oh men! Know that from that element of His Sāmarthya which determines spatial relations and which can be called the navel of this Virāt-puruṣa (the body of all bodies referred to in verse five) the intermediate regions came into being. From His head, that is, the highest portion of His Sāmarthya the celestial regions (consisting of the sun &c.,) were produced. From His feet or the terrestrial elements of the Sāmarthya of God the earth and waters came into being. From the ears, that is, the aural elements of His Sāmarthya He produced the directions. In the same manner, you should know, other spheres and the animate and inanimate objects in them are produced.

भावार्थः—हे मनुष्या यद्यदत्र सृष्टौ कार्यभूतं वस्तु वर्तते तत्तत्सर्वं विराडाख्यस्य कार्यकारणस्याऽवयवरूपं वर्तत इति वेद्यम् ॥

Purport:—Oh men! it should be understood that whatever created there is in the cosmos, is simply a part of what is called Virāt the cause, itself an effect.

(९८) यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥१४॥

पदपाठः—यत् पुरुषेण हविषा देवाः यज्ञम् अतन्वत वसन्तः अस्य आसीत् आज्यम् ग्रीष्मः इध्मः शरत् हविः ॥

भाष्यम्=**Explanation:**—यत्पुरुषेण०=देवा विद्वांसः पूर्वोक्तेन पुरुषेण हविषा* गृहीतेन दत्तेन चाग्निहोत्राद्यश्वमेधान्तं शिल्पविद्यामयं च यद्यं यज्ञं प्रकाशितमतन्वत विस्तृतं कृतवन्तः कुर्वन्ति करिष्यन्ति च ॥

The learned extended, do and will extend the yajña (=righteons work) from the agnihōtra to the aśvamēdha and the learning and teaching of the arts and sciences, with the help of the materials given by the above-menfioned Puruṣa.

इदानीं जगदुत्पत्तौ कालस्यावयवाख्या सामग्र्युच्यते ॥

* हविस्—√हु दानादनयोरादाने चेत्येके+इसि ॥ उ० २ । १०८ ॥

Now are described the divisions of time which are necessary elements in the production of the world.

वसन्तो*ऽस्यासीदाज्यं†=अस्य यज्ञस्य पुरुषादुत्पन्नस्य वा ब्रह्माण्डमयस्य वसन्त आज्यं घृतवदस्ति ॥

Vasanta (spring) is like the ghee in this yajña or in this universe produced by the Puruṣa.

ग्रीष्म‡ इध्मः§=ग्रीष्मर्तुरिध्म इन्धनान्यग्निर्वास्ति ॥

Grīṣma (the summer season) is like the fuel or fire.

शरद्धविः$=शरदृतुः पुरोडाशादिवद्धविर्हवनीयमस्ति ॥

Śarad (the winter) is like the purōdāśa (sacrificial bread) or other oblations thrown into the fire.

NOTE. The Hindi commentary on this verse in the Ṛgvēdādi-bhāṣya-bhūmikā is a supplement to the Sanskrit portion given above; hence, for a clear understanding of the text it is given below with an English translation:—

यत्पुरुषेण०—देव अर्थात् जो विद्वान लोग होते हैं उनको भी ईश्वर ने अपने अपने कर्मों के अनुसार उत्पन्न किया है और वे ईश्वर के दिये पदार्थों का ग्रहण करके पूर्वोक्त यज्ञ का विस्तार पूर्वक अनुष्ठान करते हैं और जो ब्रह्माण्ड का रचन, पालन और प्रलय करना रूप यज्ञ है उसी को जगत् बनाने की सामग्री बताते हैं।

The learned also are produced by God according to the residua of the actions of their past lives. Receiving the things produced by God they fully co-operate in the performance of the sacrifice mentioned above (vv. 6-9 and explain the divine sacrifice in the shape of creation, sustenance and dissolution of the cosmos itself to be the material for the creation of the universe.

---

* वसन्तः—√वस वासे निवासे आच्छादने च+झच् ॥ उ० ३ । १२८ ॥

† आज्यम्—आङ्+√अञ्जु मिश्रणे गतौ च+क्यप् ॥ अजेश्चोपसंख्यानं संज्ञायामिति वार्तिकेण ॥

‡ ग्रीष्म—√ग्रस अदने+मक् ॥ उ० १ । १४५ । १४६ ॥

§ इध्म—√ञिइन्धी दीप्तौ+मक् ॥ उ० १ । १४५ ॥

$ शरत्—√शृ हिंसायाम्+अदि ॥ उ० १ । १३० ॥

वसन्तो०=पुरुष ने उत्पन्न किया जो यह ब्रह्माण्ड रूप यज्ञ है इसमें वसन्त ऋतु अर्थात् चैत्र और वैशाख घृत के समान है ॥

In this cosmic sacrifice that has been performed by Puruṣa (God), the spring season, comprising the two months of caitra and Vāiśākha, is the ghee.

ग्रीष्म इध्मः०=ग्रीष्म ऋतु जो ज्येष्ठ और आषाढ़ इन्धन है ॥

The summer season covering the two months of Jyēṣṭha and Āṣāḍha is the fuel.

श्रावण और भाद्रपद वर्षा ऋतु। आश्विन और कार्तिक शरद् ऋतु। मार्गशीर्ष और पौष हिम ऋतु और माघ तथा फाल्गुन शिशिर ऋतु कहाती है। यह इस यज्ञ में आहुति है ॥

The period covering the months of Śrāvaṇa and Bhādrapada is called the rainy season, that comprising Āśvina and Kārtika the winter, that covering the two months Mārgaśīrṣa and Pāuṣa the frosty season and finally comes the autumn during the two months of Māgha and Phālguna. All these are oblations in the cosmic sacrifice.

सो यहां रूपकालङ्कार से सब ब्रह्माण्ड का व्याख्यान जानना चाहिए ॥

It should be noted that in this manner the whole cosmos has been described in this verse (as a sacrifice) by means of a metaphor.

अन्वयः—देवाः पुरुषेण हविषा यद्यज्ञमतन्वतास्य वसन्त आज्यमासीद् ग्रीष्म इध्म शरच्च हविरासीत् ॥

Translation:—Of the sacrifice which the learned performed, do and will perform in the form of righteous works from the Agnihōtra to the Aśvamēdha and the learning and teaching of the sciences and arts, the Spring is the ghee (essential like ghee to keep up the sacrificial fire ablaze and to diffuse atoms of health-giving material in the atmosphere), Summer the fuel (necessary like fuel to feed the fire) and the Winter and other seasons the oblations (useful like the sacrificial cake, incense and other fragrant and nourishing things to render the atmosphere of the locality pure and healthy).

NOTE. Another interpretation of this verse, slightly different, but beautiful and worth study is given by Maharṣi Dayānanda in his commentary on the Yajurvēda. It is subjoined with a full English translation:—

पदार्थः=**Word-meaning:**—यत्=यदा=when. पुरुषेण=पूर्णेन परमात्मना=with God the perfect Being as the master of the Cosmic Sacrifice. हविषा=होतुमादातुमर्हेण=fit to be invoked, accepted at all times. देवाः=विद्वांसः=the enlightened. यज्ञम्=मानसं ज्ञानयज्ञम्=the spiritual sacrifice of contemplating on the cosmos itself as a sacrifice in which they are co-operating priests along with God the master thereof. अतन्वत=तन्वते विस्तृणन्ति=perform, extend. वसन्तः=पूर्वाह्णः=morning, forenoon. अस्य=यज्ञस्य= of this spiritual sacrifice. आसीत्=अस्ति=is. आज्यम्=घृतम्= ghee, molten butter; material to start the sacrifice with. ग्रीष्मः=मध्याह्नः=midday, afternoon. इध्मः=प्रदीपकः= fuel; material to feed or keep up the fire with. शरत्= अर्द्धरात्रः=midnight, evening and all the night till morning time. हविः=होतव्यंद्रव्यम्=oblations; material to burn in the sacrificial fire to diffuse fragrance and particles of healthy and disinfecting matter in the atmosphere.

अन्वयः—हे मनुष्या यद्धविषा पुरुषेण सह देवा यज्ञमतन्वत तदाऽस्य वसन्त आज्यं ग्रीष्म इध्मः शरद्धविरासीदिति यूयमपि विजानीत ॥

Translation:—Oh men! You should understand that when the enlightened perform the sacrifice of contemplating on (and teaching about) the cosmos itself as a huge sacrifice with God as the master thereof, the morning time serves as material for starting the fire of devotion in their souls, the midday becomes the fuel to keep it ablaze and the evening (and night) do duty, (so to say), for oblations to be thrown in to diffuse particles of matter endowed with purifying and health-giving influence over all creatures around.

भावार्थः—यदा बाह्यसामग्र्यभावे विद्वांसो सृष्टिकर्तुरीश्वरस्योपासनाख्यं मानसं ज्ञानयज्ञं विस्तारयेयुस्तदा पूर्वाह्णादिकाल एव साधनरूपेण कल्पनीयः ॥

Purport:—When, in the absence of external means, the enlightened engage themselves in the intellectual sacrifice offered mentally in the form of the adoration of God the Creator of the universe, the morning and other divisions of time themselves should be considered to be the matter for the performance thereof.

(९९) सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥१५॥

पदपाठः—सप्त अस्य आसन् परिऽधयः त्रिः सप्त सम्ऽइधः कृताः देवाः यत् यज्ञम् तन्वानाः अबध्नन् पुरुषम् पशुम् ॥

भाष्यम्=**Explanation**:–सप्तास्यासन्परिधयः=अस्य ब्रह्माण्डस्य सप्त* परिधयः† सन्ति। परिधिर्हि गोलस्योपरिभागस्य यावता सूत्रेण परिवेष्टनं भवति स परिधिर्ज्ञेयः। अस्य ब्रह्माण्डस्य ब्रह्माण्डान्तर्गतलोकानां वा सप्त सप्त परिधयो भवन्ति। समुद्र एकस्तदुपरि त्रसरेणुसहितो वायुर्द्वितोयः। मेघमण्डलं तत्रस्थो वायुस्तृतीयः। वृष्टिजलं चतुर्थस्तदुपरि-वायुः पञ्चमः अत्यन्तसूक्ष्मो धनञ्जयः षष्ठः। सूत्रात्मा सर्वत्र व्याप्तः सप्तमश्च। एवमेकैकस्योपरि सप्त सप्तावरणानि स्थितानि सन्ति तस्मात्ते परिधयो विज्ञेयाः॥

The universe has seven circumferences. The line which passes round the outer surface of a sphere is called its circumference. There are seven concentric circles round the universe or the spheres comprised therein, namely, (1) the ocean, (2) the atmosphere together with the small particles (the motes), (3) the region of the clouds and the air thereof; (4) the rain-water, (5) the air above it, (6) the air of extreme rarity called Dhanañjaya and (7) the ubiquitous electricity, (Sūtrātmā—literally, (the thread-soul). There are thus seven covers or circumferences one within the other.

---

* सप्तन् √षप समवाये+तुट्+कनिन् ॥ उ० १। १५६ ॥ १५७ ॥

† परिधिः—परि+√डुधाञ् धारणपोषणयोः+कि ॥ पा० ३। ३। ९२ ॥

त्रिः* सप्त समिधः† कृताः—एकविंशतिः पदार्थाः सामग्र्यस्य चास्ति। प्रकृतिमहद्बुद्ध्याद्यन्तःकरणं जीवश्चैषैका सामग्री परमसूक्ष्मत्वात्। दशेन्द्रियाणि श्रोत्रं, त्वक् चक्षु जिह्वा नासिका वाक्पादौ हस्तौ पायुरुपस्थंचेति। शब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राः पृथिव्यापस्तेजोवायुराकाशमिति पञ्चभूतानि च मिलित्वा दश भवन्ति। एवं सर्वा मिलित्वैकविंशतिर्भवन्त्यस्य ब्रह्माण्डरचनस्य समिधः कारणानि विज्ञेयानि। एतेषामवयव रूपाणि तु तत्त्वानि बहूनि सन्तीति बोध्यम्॥

The constituent elements of the universe are twenty-one in number. (1) The subtle elements comprising Prakṛti (primordial matter), Mahat i. e., the internal organs--the intellect, &c., and jīvas (souls); (2-11) the ten organs of sensation and action, viz., the ears, the epidermis, the eyes, the tongue, the nose, the organ of speech, the feet, the hands, the organ of excretion and the generative organ, (12-16) the five Tanmātras (the potential perceptibilia, viz., sound, touch, sight, taste, and smell) and (17-21) the five Bhūtās (the elements) viz., earth, water, fire, air, and ether (ākāśa). These twenty-one are to be considered the chief ingredients in the construction of the world, although there are many more sub-ingredients derived from them.

यद्यज्ञं तन्वाना‡=तदिदं येन पुरुषेण रचितं तं यज्ञपुरुषं पशुं सर्वद्रष्टारं सर्वैः पूजनीयं देवा विद्वांसोऽबध्नन्=ध्यानेन बध्नन्ति तं विहायेश्वरत्वेन कस्यापि ध्यानं नैव बध्नन्ति नैव कुर्वन्तीत्यर्थः॥

The learned fasten with their contemplation the Puruṣa Who is All-seeing, the adorable Deity and the Maker of this universe. They do not concentrate their mind upon any other object than God.

अन्वयः—अस्य ब्रह्माण्डस्य सप्त परिधयः आसंस्त्रिः सप्त समिधश्च कृताः सन्ति। तदिदं येन रचितं तं पुरुषं पशुं यज्ञं तन्वाना देवा अबध्नन्॥

Translation:—Of the altar of this Cosmic Sacrifice in the shape of the universe there are seven circumferences (viz., the ocean, the atmosphere with the motes, the region of the clouds along with the air thereof, the rain-water, the air above it, the Dhanañ-

---

* त्रिः—√तॄ प्लवनसंतरणयोः + ड्रि + सुच्॥ उ० ५। ६६॥ पा० ५।४।१८॥

† समिधः—सम् + √ञिइन्धी दीप्तौ + क्विप्॥ पा० ३।२।१७८॥

‡ तन्वानाः—√तनु विस्तारे + शानच्॥ पा० ३।२।१२४॥

jaya vāyu and the Sūtrātma vāyu) and the sacrificial sticks to be burnt in it (in the shape of the ingredients of which it is made) are twenty-one (i. e., the primordial matter &c., the ten sense and motor organs, the five tanmātras, and the five mahābhūtas). The enlightened who perform the spiritual sacrifice of meditating on God the Creator of this universe, the All-seeing, bind Him, so to say, by contemplation.

भावार्थः—हे मनुष्या यूयमिममनेकविधकल्पितपरिध्यादिसामग्रीयुक्तं मानसं यज्ञं कृत्वा पूर्णमीश्वरं विज्ञाय सर्वाणि प्रयोजनानि साध्नुत ॥

Purport:—Oh men ! accomplish all your legitimate objects having arrived at a true knowledge of God by offering through contemplation the mental sacrifice described in this verse and constituted of the various circumferences and other parts.

(१००) यज्ञेन॑ यज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथमान्या॑सन् । ते ह॒ नाकं॑ महि॒मान॑: सचन्त॒ यत्र॒ पूर्वे॑ साध्या: सन्ति॑ दे॒वा: ॥१६॥

पदपाठः—यज्ञेन॑ य॒ज्ञम् अ॒यज॒न्त दे॒वा: तानि॑ धर्मा॑णि प्र॒थमा॑नि आ॒सन् ते ह॒ नाकं॑म् म॒हि॒मान॑: स॒चन्त॒ यत्र॑ पूर्वे॑ सा॒ध्या: सन्ति॑ दे॒वा: ॥

भाष्यम्=**Explanation**:—यज्ञेन०=ये देवा विद्वांसो यज्ञं यजनीयं पूजनीयं परमेश्वरं यज्ञेन तत्स्तुतिप्रार्थनोपासनरीत्या पूजनेन तमेवायजन्त यजन्ते यक्ष्यन्ति च ॥

The enlightened have paid, do and will always pay homage to God the Worshipful, with praise, prayer and worship.

तानि धर्माणि०*=तान्येव धर्माणि प्रथमानि† सर्वकर्मभ्य आदौ सर्वैर्मनुष्यैः कर्तव्यान्यासन् । न च तैः पूर्वं कृतैर्विना केनापि किंचित्कर्म कर्तव्यमिति ॥

All men ought to begin all actions with these and no one ought to do anything which is not preceded by them.

---

* धर्माणि—√धृञ् धारणे + मन् ॥ उ० १ । १४० ॥

† प्रथमानि—√प्रथ प्रख्याने + अमच् ॥ उ० १ । ६८ ॥

ते ह नाकम्०‡=त ईश्वरोपासका हेति प्रसिद्धं नाकं सर्वदुःखरहितं परमेश्वरं मोक्षं च महिमानः§ पूज्याः सन्तः सचन्त समवेता भवन्ति ॥

Verily do the worshippers of God, exalted in glory, attain to Him and emancipation in which there is no pain or suffering.

कीदृशं तत्। यत्र पूर्वे साध्याः०=साध्याः साधनवन्तः कृतसाधनाश्च देवाः विद्वांसः पूर्वे अतीता यत्र मोक्षाख्ये परमे पदे सुखिनः सन्ति। न तस्माद्ब्रह्मणः शतवर्षसंख्यातात्कालात्कदाचित्पुनरावर्तन्त इति किन्तु तमेव समसेवन्त ॥

The enlightened who qualified themselves in the past and those who are qualifying themselves now and those who will qualify themselves in the future, obtained and will obtain this highest state of bliss to be enjoyed for a hundred years of Brahma during which period there is no return to the cycle of births and deaths.

अत्राहुर्निरुक्तकारा यास्काचार्याः। यज्ञेन यज्ञमयजन्त देवा अग्निनाग्निमयजन्त देवा अग्निः पशुरासीत्तमालभन्त तेनायजन्तेति च ब्राह्मणम्। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः समसेवन्त यत्र पूर्वे साध्याः सन्ति देवाः साधना। द्युस्थानो देवगण इति नैरुक्ताः॥ निरुक्त अ० १२। खं० ४१॥ अग्निना जीवेनान्तःकरणेन वाग्निं परमेश्वरमयजन्त। अग्निः पशुरासीत्तमेव देवा आलभन्त। सर्वोपकारकमग्निहोत्राद्यश्वमेधान्तं भौतिकाग्निनापि यज्ञं देवा समसेवन्तेति वा। साध्याः साधनवन्तो यत्र पूर्वे पूर्वं भूता मोक्षाख्यानन्दे पदे सन्ति। तमभिप्रेत्यात एव द्युस्थानो देवगण इति निरुक्तकारा वदन्ति। द्युस्थानः प्रकाशमयः परमेश्वरः स्थानं स्थित्यर्थं यस्य सः। यद्वा सूर्यप्राण¶ स्थानाः विज्ञानकिरणास्तत्रैव देवगणो देवसमूहो वर्तत इति ॥

On this verse Yāskācārya, the author of the Nirukta, observes: "The learned worshipped God with the soul and internal organs or they performed the universally beneficial yajñas (sacrifices) from the agnihōtra up to the aśvamēdha, with the help of the terrestrial fire. Those who adopted the prescribed means and qualified themselves in former times are enjoying the bliss of emancipation—the

---

‡ नाकम्—see p. 102. § महिमानः—√मह पूजायाम्+इमनिच् ॥ उ० ४। १४८=glorious, venerable. √मह+अति+इमनिच् ॥ उ० २। ८४॥ पा ५। १। १२२=glory. ¶ Breath inhailed through the right nostril is called 'Sūrya' while that inhailed through the left is termed 'Candra'. The phrase means "yogis who are adepts in the regulation of breathing."

highest state. The followers of the etymological school call this band of the learned (devas) the dwellers of the regions of light, i. e., God, who is self-effulgent or because the devas live in the rays of knowledge by perfect regulation of breath*.

अन्वयः—हे मनुष्या ये देवा यज्ञेन यज्ञमयजन्त तानि धर्माणि प्रथमान्यासंस्ते महिमानः सन्तो यत्र पूर्वे साध्या देवाः सन्ति तन्नाकं ह सचन्त तद्यूयमप्याप्नुत ॥

Translation:—Oh men! the enlightened have paid (do and will always pay) homage to God the worshipful with praise, prayer and worship, for, these are the most important duties which one should attend to before everything else. Those who thus worship God, exalted in glory attain to Him and emancipation in which there is no suffering, which highest state of bliss the learned who qualified themselves in the past obtained (and those who do so now and will do so in the future will obtain). You also should endeavour to attain it.

भावार्थः—मनुष्यैर्योगाभ्यासादिना सदा परमेश्वर उपासनीयः। अनेनानादिकालीनधर्मेण मुक्तिसुखं प्राप्य पूर्वविद्वद्वदानन्दितव्यम् ॥

Purport:—Men should always undergo yogic discipline or such other spiritual exercise and worship God. By the discharge of this duty prescribed from time immemorial one should obtain the bliss of emancipation and rejoice as the enlightened before them did.

(१०१) अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे। तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१७॥

पदपाठः—अत्ऽभ्यः सम्ऽभृतः पृथिव्यै रसात् च विश्वऽकर्मणः सम् अवर्तत अग्रे तस्य त्वष्टा विऽदधत् रूपम् एति तत् मर्त्यस्य देवऽत्वम् आऽजानम् अग्रे ॥

---

* See p. 140.

भाष्यम्=**Explanation**:—अद्भ्यः संभृतः०—तेन पुरुषेण पृथिव्यै—पृथिव्युत्पत्त्यर्थमद्भ्यो रसः संभृतः। संगृह्य रसात्¶=तेन रसेन पृथिवी रचिता। एवमग्निरसेनाग्नेः सकाशादाप उत्पादिताः। अग्निश्च वायोः सकाशाद्वायुराकाशादुत्पादित आकाशः प्रकृतेः प्रकृतिः स्वसामर्थ्याच्च॥

The Supreme Being, in order to form the earth made the attenuated matter (āpah) solid and thus made the earth. Similarly He produced the attenuated matter from the igneous matter, the igneous from the gaseous and the gaseous from ether (ākāśa) and the etheric from the primordial (prakṛti) which He caused to evolve from His 'Sāmarthya'.

विश्वकर्मा* =विश्वं सर्वं कर्म क्रियमाणमस्य स विश्वकर्मा। तस्य परमेश्वरस्य सामर्थ्यमध्ये कारणाख्येऽग्रे† सृष्टेः प्राग्जगत्समवर्तत=वर्तमानमासीत्। तदानीं सर्वमिदं जगत्कारणभूतमेव नेदृशमिति॥

The universe before the creation existed (potentially) in its cause called the Sāmarthya of God Who is called Viśvakarman—the Universal Architect because He is the Doer (par excellence) of all action. At that time the whole of this universe was in the causal state and not such (as it appears to us now).

तस्य सामर्थ्यस्यांशान्गृहीत्वा त्वष्टा‡=रचनकर्त्तेदं सकलं जगद्विदधत्=रचितवान्। पुनश्चेदं विश्वं रूपम्§=रूपवत्त्वमेति। तदेव मर्त्यस्य§=मरणधर्मकस्य विश्वस्य मनुष्यस्यापि च रूपवत्त्वं भवति॥

The Tvaṣṭā—the Fashioner—made the universe with parts of that Sāmarthya. Then the whole universe assumed a perceptible form (rūpavat-tvam). Then also mortal man assumed a visible form (i. e., was created).

¶ रसात्—√रस आस्वादे+अच्॥ पा० ३। १। १३४॥

* विश्वकर्मा—विश्वेषु कर्म यस्य—विश्व+√डुकृञ्+मनिन्॥ उ० ४। १४५॥ पा० २। २। २४॥

† अग्रे—√अगि गतौ+रन्॥ उ० २। २७॥ २८॥

‡ त्वष्टा—√त्वक्षू तनूकरणे+तृन्॥ उ० २। ९४॥ ९५॥ त्वष्टा तूर्णमश्नुत इति (√त्वर्+√अशूङ्+तृन्) नैरुक्ताः। त्विषेर्वा स्याद्दीप्तिकर्मणः (√त्विष्+तृन्)। त्वक्षतेर्वा स्यात्करोतिकर्मणः (√त्वक्षू+तृन्)। इति निरुक्ते ८। १३॥

§ रूपम्—√रु शब्दे+प॥ उ० ३। २३॥ २८॥

आजानमग्रे॥—वेदाज्ञापनसमये परमात्माज्ञप्तवान्वेदरूपामाज्ञां दत्तवान्मनुष्याय धर्मयुक्तेनैव सकामेन कर्मणा कर्मदेवत्वयुक्तं शरीरं धृत्वा विषयेन्द्रियसंयोगजन्यमिष्टं सुखं भवतु तथा निष्कामेन विज्ञानपरमं मोक्षाख्यं चेति ॥

At the time of revealing the Vedas, God promulgated this commandment for man through the Vedas themselves: "Thou shalt find the desired happiness arising from the contact of the objects with the senses by performing with thy action-body righteous works with attachment and thou shalt obtain the highest knowledge called emancipation by performing works without attachment".

अन्वयः—अग्रे तेन पुरुषेण पृथिव्या अद्भ्यो रसः सम्भृतस्तस्माद्रसाच्च पृथिवी रचिता । सर्वमिदं जगदग्रे विश्वकर्मणः सकाशात्स्वकारणरूपे सामर्थ्ये समवर्तत । तस्यैव त्वष्टेदं जगद्विदधत्तद्रूपमेति । तदेव मर्त्यस्य रूपमेति यं देवत्वमाजानं परमेश्वरः सृष्टवान् ॥

Translution:—In the beginning, for the making of the earth the attenuated matter was made solid by the Supreme Being and therefrom the earth fashioned; for the whole of this cosmos was, in the beginning, in its ultimate causal form, viz., the material Omnipotence of God which was with Him (under His control). The Almighty Fashioner fashioned of this the universe endowed with various forms. That itself under the hand of the Almighty Architect assumed the form of mortal man whom He made endowed with such potencies as would raise him to the highest position of the enlightened among men (if he followed His Vedic Law).

भावार्थः—हे मनुष्या योऽखिलकार्यकर्ता परमात्मा कारणात्कार्याणि निर्मिमीते सकलस्य जगतः शरीराणां रूपाणि विदधाति तज्ज्ञानं तदाज्ञापालनमेव देवत्वमस्तीति जानीत ॥

Purport:—Oh men ! know ye that wisdom consists in knowing and obeying the commandments of that Almighty God Who has the power to do everything, Who is the Promulgator of the law of causation and gives their shape to the world and all embodied beings.

मर्त्यस्य—√मृङ् प्राणत्यागे+तन्+यत् ॥ उ० ३ । ८६ ॥ पा० ५ । १ । ५ ॥

(१०२) वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥१८॥

पदपाठः—वेद अहम् एतम् पुरुषम् महान्तम् आदित्यऽवर्णम् तमसः परस्तात् तम् एव विदित्वा अति मृत्युम् एति न अन्यः पन्थाः विद्यते अयनाय ॥

भाष्यम्=Explanation:—किं विदित्वा त्वं ज्ञानी भवसीति पृच्छ्यते । तदुत्तरमाह । यतः पूर्वोक्तलक्षणविशिष्टं सर्वेभ्यो महान्तं* । वृद्धतमसादित्यवर्णं† स्वप्रकाशविज्ञानस्वरूपं तमसो‡ऽज्ञानाऽविद्यान्धकारात्परस्तात्पृथग्वर्तमानं परमेश्वरं पुरुषमहं वेद जानाम्यतोऽहं ज्ञान्यस्मीति निश्चयः ॥

This verse is an answer to the question 'By knowing what canst thou become wise ?' The answer is:—'I am certainly wise because I know the Puruṣa', the Supreme Lord Whose attributes have been described above, Who is the greatest of all, the Oldest, Self-effulgent, above and beyond the darkness of ignorance and nescience.'

नैव तमविदित्वा कश्चिज्ज्ञानी भवितुमर्हतीति । कुतः । तमेव विदित्वेत्यादि । मनुष्यस्तमेव पुरुषं परमात्मानं विदित्वाऽतिमृत्युं मृत्युमतिक्रान्तं

* महान्तम्—√मह पूजायाम्+अति ॥ उ० २ । ८४ ॥ तम् ॥

† आदित्यवर्णम्—स्वप्रकाशदानेन आदित्यं वृणोति प्रकाशयति अथवा स्वप्रकाशेन आदित्यं वारयति दूरीकरोति यद्वा स्वभक्तहृदयप्रकाशने आदित्यम् सूर्यमपि अतिशेते इति आदित्य +√वृञ्+न ॥ उ० ३ । ६ । १० ॥

‡ तमसः—तमस्तनोतेरिति **श्री यास्काः** ॥ २ । १६ ॥ √तनु विस्तारे+असुन् ॥ उ० ४ । १८६ ॥ खेदार्थकात्तनिर् धातोरौणादिक असुन्प्रत्यय इति **क्षेमकरणदासकृत अथर्ववेदभाष्ये** अ० १ । २१ । २ ॥ तम् 4. P. 1. To choke, be suffocated.—2. To be exhausted or fatigued.—3 To be distressed (in body or mind), be uneasy or pained, pine, waste away.—4. To stop, become immovable.—5. To wish, desire इति प्रो० **आप्टेकृत संस्कृताङ्गलकोशे** । कांक्षायां √तमुधातोरौणादिकेनासुन् प्रत्ययेन **माधवीयधातुवृत्तौ** साधितः ॥

मृत्योः पृथग्भूतं मोक्षाख्यमानन्दमेति प्राप्नोति नैवातोऽन्यथेति ॥

No one can become wise without knowing Him because, by knowing the 'Puruṣa' the Supreme Lord alone, can a man cross death and attain to that state of the highest bliss (emancipation) which is beyond death. There is no other means of reaching that state.

एवकारात्तमीश्वरं विहाय नैव कश्चिदन्यस्य लेशमात्राप्युपासना केनचित्कदाचित्कार्येति गम्यते । कथमिदं विज्ञायतेऽन्यस्योपासना नैव कार्येति ॥

The use of the word 'only' (ēva) in the text shows that no one should ever offer the slightest worship to any one except God (as the Deity). That this in fact is the meaning is also apparent from the following words.

नान्यः पन्था* विद्यतेऽयनाये†तिवचनात् । अयनाय व्यावहारिकपारमार्थिकसुखायाऽन्यो द्वितीयः पन्था मार्गो न विद्यते । किन्तु तस्यैवोपासनमेव सुखस्य मार्गोऽतो भिन्नस्येश्वरगणनोपासनाभ्यां मनुष्यस्य दुःखमेव भवतीति निश्चयः । अतः कारणादेष एव पुरुषः सर्वैरुपासनीय इति सिद्धान्तः ॥

'There is no other way for reaching the goal.' There is no other way of obtaining happiness either in the affairs of this world or those concerning the other world. The only road to happiness is the worship of God alone. There can be no doubt that by believing and worshipping another as God man comes to grief. The settled conclusion, therefore, is that the 'Puruṣa' alone is the (legitimate) object of worship for all men.

अन्वयः—अहमेतं महान्तमादित्यवर्णं तमसः परस्ताद्वर्तमानं पुरुषं वेद । तमेव विदित्वा मनुष्योऽतिमृत्युमेति । अयनायान्यः पन्था न विद्यते ॥

Translation:—I know this Supreme Being, the Greatest of all, the Self-effulgent Sun that dispels the darkness of ignorance that mars man's mind and is Himself ever beyond it. Man can reach his goal,

---

* पन्थाः—√पत गतौ+थ+इनि ॥ उ० ४ । ६ । १२ ॥ √पथे गतावित्यस्माद्धातोः पचाद्यचि (पा० ३ । १ । १३४ ॥) कृते पथः पथौ पथाः । इत्यदन्तोऽपि दृश्यत इति श्री महर्षि दयानन्दाः स्वकृतोणादिवृत्तौ ॥

† अयनाय—गमनाय—√अय गतौ+ल्युट् ॥ पा० ३ । ३ । ११५ ॥

emancipation, only by knowing and worshipping Him alone and there is no other way of achieving this.

भावार्थः—यदि मनुष्या ऐहिकपारमार्थिकसुखे इच्छेयुस्तर्हि सर्वेभ्यो बृहत्तमं स्वप्रकाशानन्दस्वरूपमज्ञानलेशाद्दूरे वर्तमानं परमात्मानं ज्ञात्वैव मरणाद्यगाधदुःखसागरात्पृथग्भवितुं शक्नुवन्त्ययमेव सुखप्रदो मार्गोऽस्ति। अस्मादन्यः कश्चिदपि मनुष्याणां मुक्तिमार्गो न भवति ॥

Purport:—If men wish to attain happiness in this world and the next, then (let it be known that) they can escape the unfathomable ocean of suffering and death only by knowing the Supreme Being Who is the Greatest of all, Whose essence is light and bliss and in Whom there can not be an iota of ignorance. This is the only way which can confer happiness on mankind. There is no other means by which man can secure emancipation.

(१०३) प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते। तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥१६॥

पदपाठः—प्रजाऽपतिः चरति गर्भे अन्तः अजायमानः बहुधा वि जायते तस्य योनिम् परि पश्यन्ति धीराः तस्मिन् ह तस्थुः भुवनानि विश्वा ॥

भाष्यम्=**Explanation**:—प्रजापतिरिति*—स एव प्रजापतिः सर्वस्य स्वामी जीवस्यान्यस्य च जडस्य जगतोऽन्तर्गर्भे† मध्येऽन्तर्यामिरूपेणाजायमानो‡ऽनुत्पन्नोऽजः सन्नित्यं चरति। तत्सामर्थ्यादेवेदं सकलं जगद्बहुधा§ बहुप्रकारं विजायते विशिष्टतयोत्पद्यते ॥

---

* प्रजापतिः—प्रजानां पाता वा पालयिता वेति श्री यास्कमहर्षयः ॥ नि० १० । ४२ ॥ पा० २ । २ । ८ ॥ प्रजा—प्रकर्षेण जाता इति ॥ प्र+√जनी प्रादुर्भावे+ड ॥ पा० ३ । २ । ६९ ॥ पतिः √पा पालने+डति ॥ उ० ४ । ५७ ॥

† गर्भे—मध्ये—√गॄ शब्दे+भन् ॥ उ० ३ । १५२ ॥

‡ अजायमानः—नञ्+√जनी प्रादुर्भावे+मुक्+शानच् ॥ पा० ७ । २ । ८२ ॥ ३ । २ । १२४ ॥ २ । २ । ६ ॥ ६ । ३ । ७३ ॥

§ बहुधा—बहु+धा ॥ पा० १ । २ । ३१ ॥ ५ । ३ । ४२ ॥

The Lord of creatures, the Ruler of all the animate and inanimate world, resides within it as its Indwelling Ruler. He is unborn and increate. By His might alone the whole world is decked out with variegated objects.

तस्य योनिं§—तस्य परब्रह्मणो योनिं सत्यधर्मानुष्ठानं वेदविज्ञानमेव प्राप्तिकारणं धीरा|| ध्यानवन्तः परिपश्यन्ति परितः सर्वतः प्रेक्षन्ते ॥

Those who can concentrate their mind upon Him obtain a perfect vision of His nature, i. e., they know that the way to realise Him is the performance of righteous acts and the acquisition of Vedic knowledge.

तस्मिन्ह तस्थुरित्यादि--यस्मिन्भुवनानि* विश्वानि† सर्वाणि सर्वे लोकास्तस्थुः स्थितिं चक्रिरे। हेति निश्चयार्थे। तस्मिन्नेव परमे पुरुषे धीरा ज्ञानिनो मनुष्या मोक्षानन्दं प्राप्य तस्थुः स्थिरा भवन्तीत्यर्थः ॥

In Him all the worlds find their support. 'Ha' is used here in the sense of certainty. Verily in Him—the Supreme Lord—do the constant and the wise rest satisfied and secure, by obtaining the bliss of emancipation.

अन्वयः—स एव प्रजापतिरजायमानो जीवस्यान्यस्य च जड़स्य जगतोऽन्तर्गर्भे सन्नित्यं चरति। तत्सामर्थ्यादेवेदं सकलं जगद्बहुधा विजायते। तस्य योनिं धीराः परिपश्यन्ति। तस्मिन्ह विश्वा भुवनानि तस्थुः ॥

Translation:—That very Lord of creatures Who is Unborn, being Immanent everywhere in the animate as well as inanimate universe, ever moves in it (by His Providence). It is from His 'Material Omnipotence' (Sāmarthya) that the whole cosmos of motley forms

---

§ योनिम्—प्राप्तिकारणम्—√यु मिश्रणामिश्रणयोः+नि ॥ उ० ४ । ४८ ॥ ५१ ॥

|| धीराः—ध्यानवन्तः—√डुधाञ् धारणपोषणयोः+क्रन् ॥ उ० २ । २४ ॥ पा० ६ । ४ । ६६ ॥ अथवा √ध्यै चिन्तने+क्विप्+र ॥ पा० ३ । २ । १७८ ॥ वा० ध्यायतेः सम्प्रसारणं च ॥ पा० ५ । २ । ६४ ॥ अथवा धियमीरयतीति—धी+√ईर प्रेरणे+अण् ॥ पा० ३ । २ । १ ॥ २ । २ । १९ ॥ अथवा धियम्राति—धी+√रा दाने+क ॥ पा० ३ । २ । ३ ॥ २ । २ । १९ ॥

* भुवनानि—लोकाः—भवन्ति भूतान्यस्मिन्निति—√भू सत्तायाम्+क्युन् ॥ उ० २ । ८० ॥

† विश्वा—√विश प्रवेशने+कन् ॥ उ० १ । १५१ ॥ पा० ६ । १ । ७० ॥

comes into being. Those who are given to meditation see Him in His True Nature. In Him do all the worlds find their stay.

भावार्थः—योऽयं सर्वरक्षक ईश्वरः स्वयमनुत्पन्नः सन्स्वसामर्थ्याज्जगदुत्पाद्य तत्रान्तःप्रविश्य सर्वत्र विचरति यमनेकप्रकारेण प्रसिद्धं विद्वांस एव जानन्ति तं जगदधिकरणं सर्वव्यापकं परमात्मानं विज्ञाय मनुष्यैरानन्दितव्यम् ॥

Purport:—Men should rejoice by knowing that Supreme Being, the All-pervading Refuge of the whole world, the Saviour and Ruler of all, and Who, Himself Unborn, creates the universe out of His 'Omnipotence' (Sāmarthya) and entering into it (by His Divine Immanence) moves all through it and Whom, well-known as He is in several ways, only the enlightened know.

(१०४) यो देवेभ्य आतपति यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥

पदपाठः—यः देवेभ्यः आऽतपति यः देवानाम् पुरःऽहितः पूर्वः यः देवेभ्यः जातः नमः रुचाय ब्राह्मये ॥

भाष्यम्=**Explanation**:—यो देवेभ्य* इति—यः पूर्णः पुरुषो देवेभ्यो विद्वद्भ्यस्तत्प्रकाशार्थमातपति आसमन्तात्तदन्तःकरणे प्रकाशयति नान्येभ्यश्च । यश्च देवानां विदुषां पुरोहितः† सर्वैः सुखैः सह मोक्षे विदुषो दधाति ॥

The All-pervading, the Perfect 'Puruṣa' sheds His lustre into the inner sense of the learned, but not into that of any one else, in order to illumine them. He is the Chief Priest and the Benefactor of the enlightened because He bestows on them the bliss of emancipation which contains all happiness.

पूर्वो‡ यो देवेभ्य जात इति—देवेभ्यो विद्वद्भ्यो यः पूर्वः पूर्वमेव सनातनत्वेन वर्तमानः सञ्जातः प्रसिद्धोऽस्ति ॥

---

* देवेभ्यः—see p. 5.

† पुरोहितः—see p. 5.

‡ पूर्वः—see p. 11.

He has been in existence from before the birth of the enlightened because He is Eternal.

नमो रुचायेति$—तस्मै रुचाय रुचिकराय ब्रह्मणे नमोऽस्तु। यश्च देवेभ्यो विद्वद्भ्यो ब्रह्मोपदेशं प्राप्य ब्रह्मरुचिर्ब्राह्मि*ब्रह्मणोऽपत्यमिव वर्तमानोऽस्ति। तस्मा अपि ब्रह्मसेवकाय नमोऽस्तु॥

Our salutations are due to the Lovable Brahma—the Supreme Being and also to His servants who, having acquired His knowledge from the learned, love Him with the love of a child for its parents

अन्वयः—यः पूर्णः पुरुषो देवेभ्य आतपति यो देवानां पुरोहितोऽस्ति यो देवेभ्य पूर्वो वर्तमानः सञ्जातस्तस्मै रुचाय ब्रह्मणे नमः। तदपत्यमिव वर्तमानाय तस्य भक्ताय ब्राह्मयेऽपि नमोऽस्तु॥

Translation:—That Perfect Being sheds lustre into the hearts of the enlightened whom He leads to the bliss of emancipation and Who is known to have existed before them. May our obeisance be to that Supreme Being ! Salute also to that devotee of His who is like His son (owing to his religious life and submission to His commandments).

भावार्थः—हे मनुष्या यो जगदीश्वरः सर्वेषां विदुषां मनांसि स्वप्रकाशेन सूर्यवत्प्रकाशयति यः स्वभक्तान्पुत्रवत्पालयति च तस्यैवोपासना युष्माभिर्विधातव्या नान्यस्य तस्य सेवकाश्चादरणीया इति जानीत॥

Purport:—Oh men ! know ye that you should adore none but that Lord of the universe, Who by His lustre like the sun illumines the mind of all the learned and who protects His devotees like His children, and that His servants should be respected by you.

(१०५) रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे॥२१॥

पदपाठः—रुचम् ब्राह्मम् जनयन्तः देवाः अग्रे तत् अब्रुवन् यः त्वा एवम् ब्राह्मणः विद्यात् तस्य देवाः असन् वशे॥

$ रुचाय—अभिप्रीताय—√रुच दीप्त्यभिप्रीत्योः + क॥ पा० ३।१।१३५॥
* ब्राह्मये—परमात्मनः पुत्रवद्वर्तमानाय सत्पुरुषाय। ब्रह्मन् + इञ् टिलोपः॥ पा० ४।१।९२॥

भाष्यम्=**Explanation:**—रुचं ब्राह्म*मिति—रुचं प्रीतिकरं ब्राह्मं ब्रह्मणोऽपत्यमिव ब्रह्मणः सकाशाज्जातं ज्ञानं जनयन्त† उत्पादयन्तो देवा विद्वांसोऽन्येषामग्रे तज्ज्ञानं तज्ज्ञानसाधनं वाऽब्रुवन्ब्रुवन्तूपदिशन्तु च ॥

May the learned, who acquire this most lovable divine knowledge which is born of God and hence is called His child, teach it and the means of acquiring it, to others.

यस्त्वैवमिति—यस्त्वैवममुना प्रकारेण तद्ब्रह्म ब्राह्मणो‡ विद्यात्तु पश्चात्तस्यैव ब्रह्मविदो ब्राह्मणस्य देवा इन्द्रियाणि वश§असन्भवन्ति नान्यस्येति ॥

He, who acquires the knowledge of Brahma in this way, is called a Brāhmaṇa. The senses come under the control of the Brāhmaṇa who knows Brahma but never under the control of one who does not know Him.

अन्वयः—रुचं ब्राह्मं जनयन्तो देवा अन्येषामग्रे तद्ब्रुवन् । यो ब्राह्मणस्त्वैवं तद्ब्रह्म विद्यात्तस्य देवा वशे असन् ॥

Translation:—The enlightened, who acquire this lovable divine knowledge born of God, should teach it to others. He who acquires the knowledge of God thus, is called a Brāhmaṇa and the senses of such a one come under his control.

भावार्थः—इदमेवाद्यं विद्वत्कृत्यमस्ति यद्वेदेश्वरधर्मादिषु रुचिरुपदेशाध्ययनाध्यापनधार्मिकत्वजितेन्द्रियत्वशरीरात्मबलवर्धनमेवं कृते सति सर्वे दिव्या गुणा भोगाश्च प्राप्तुं शक्याः ॥

Purport:—This is the first duty of the learned that they should inculcate in the minds of others a love for the Vedas, God and rectitude of life, propagation of truth, learning, teaching, uprightness, control of the senses and development of corporeal and spiritual vigour. This done, all superhuman virtues and bliss can be enjoyed.

---

* ब्राह्मम्—ब्रह्मसम्बन्धिनम्—ब्रह्मन्+अण् ॥ पा० ४ । २ । २४ ॥

† जनयन्तः—√जनी प्रादुर्भावे+णिच्+शतृ ॥ पा० ३ । १ । २६ ॥ २ । १२४ ॥

‡ ब्राह्मणः—ब्रह्म वेदं परमेश्वरं वा जानातीति ब्रह्मन्+अण् ॥ पा० ४ । २ । ५६ ॥

§ वशे—प्रभुत्वे—√वश कान्तौ+अप् ॥ वा० वशिरण्योरुपसंख्यानम् ॥

(१०६) श्रीश्च॑ ते लक्ष्मीश्च पत्न्या॑वहोरा॒त्रे पा॒र्श्वे नक्ष॑त्राणि रू॒पम॒श्विनौ॒ व्यात्त॑म् । इ॒ष्णन्नि॑षाणा॒मुं म॑ इषाण सर्वलो॒कं म॑ इषाण ॥२२॥

पदपाठः—श्रीः च॒ ते॒ ल॒क्ष्मीः च॒ पत्न्यौ॑ अ॒हो॒रा॒त्रे पा॒र्श्वे नक्ष॑त्राणि॒ रू॒पम् अ॒श्विनौ॑ वि॒ऽआत्त॑म् इ॒ष्णन् इ॒षा॒ण अ॒मुम् मे॒ इ॒षा॒ण स॒र्व॒ऽलो॒कम् मे॒ इ॒षा॒ण ॥

भाष्यम्=Explanation:—श्रीः (√श्रिञ् सेवायाम्+क्विप् U. II, 57)=सकला शोभा=all the glory or splendour. च=and. ते=तव=Thine. लक्ष्मीः (√लक्ष आलोचने+ई U. III, 160)=सर्वमैश्वर्यम्=all power. पत्न्यौ (√पा रक्षणे+डति+नुक्+ङीप् U. IV, 57; P. IV, 1, 32 and 1, 5)=स्त्रीवद्वर्तमाने=being like the wife, i. e., protecting and sustaining the universe. अहोरात्रे (अहश्च रात्रिश्चेति P. II, 2, 29 and V, 4, 87)=day and night. पार्श्वे (√स्पृश संस्पर्शने+श्वण् U. V, 27)=like the two sides. नक्षत्राणि (√णक्ष गतौ+अत्रन् U. III, 105; न विद्यते क्षत्रम् स्वतेजो येषाम् तानीति नञ्+क्षत्र, Vārtika नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः and P. VI, 3, 75 also Nir. III, 20*)=the constellations, stars. रूपम् (√रु शब्दे+प U. III, 27)=like the form or countenance. अश्विनौ=सूर्याचन्द्रमसौ=the sun and the moon. व्यात्तम्=विकासितं मुखमिव। अत्र वि, आङ् पूर्वाड्डुदाञ् धातोः क्तः (P. III, 2, 102 and VII, 4, 47)=opened wide like the mouth. इष्णन् (√ईष आभीक्ष्ण्ये+शतृ P. III, 2, 124)=इच्छन्=wishing. इषाण=(imperative 2nd pers. sing.)=कामय=desire thou. अमुम्=इतः परं परोक्षं सुखम्=the unseen bliss hereafter. मे=मह्यम्=for me. इषाण=प्रापय=lead to, grant to attain. सर्वलोकम् (सर्व+√लोकृ दर्शने+घञ् P. III, 3, 19)=सर्वेषां दर्शनम्=sight, view, attainment,

अन्वयः—हे जगदीश्वर यस्य ते श्रीश्च लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे यस्य ते सृष्टावश्विनौ व्यात्तं मुखमिव नक्षत्राणि रूपं सन्ति स त्वं मेऽमुमिष्णन्निषाण मे सर्वलोकमिषाण ॥

* नक्षत्राणि नक्षतेर्गतिकर्मणः । नेमानि क्षत्राणीति च ब्राह्मम् ॥ नि० ३ । २० ॥

Translation:—Oh Almighty God, Lord of the world ! the whole splendour and all the power (and pelf) of the entire universe (visible and invisible) are completely submissive to Thy Divine Majesty like an obedient wife unto her husband. The day and night are like the front and back of Thy infinite body in the shape of the universe. The sun at daytime and the moon at night (during the bright half of the month) are like the open (unveiled) mouth (face) of that body of Thine. When there is no moon at night (during the dark half of the month) the constellations display the wonderful beauty of Thy body. Oh Lord Who commandest such power and glory, may it be Thy will to bless me with final beatitude (hereafter) and all true happiness (here).

भावार्थः—हे राजादयो मनुष्या यथेश्वरस्य न्यायादयो गुणा व्याप्तिः कृपा पुरुषार्थः सत्यं रचनं सत्या नियमाश्च सन्ति तथैव युष्माकमपि सन्तु यतो युष्माकमुत्तरोत्तरं सुखं वर्द्धेतेति ॥

Purport:—Oh ye who rule over and lead others and ye who are ruled and led ! May you all be blest with good and great virtues like unto God Almighty Whose attributes, as justice &c., are perfect, Who is all-pervading, gracious, ever active, Whose disposal (of the cosmos) is truthful (=everlasting) and Whose dispensations (=laws) are perfect.

This is the commentary on the Puruṣa-sūkta by the Maharṣi Dayānanda Sarasvatī. How reasonable it is, can be seen from the following extract from the Mundakōpaniṣad. As for its scholarly handling of Vedic matter the innumerable quotations given in it are enough to convince any fair-minded person:—

तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षरा*त्पुरुषाः† सोम्य भावाः प्रजायन्ते तत्रैवापियन्ति ॥१॥

दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥२॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥३॥

---

* अक्षरात्=प्रकृतेः=from the Primordial Matter.

† पुरुषाः=शरीरिणः=embodied beings and not souls.

अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥४॥

तस्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्याम् । पुमान्रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात्सम्प्रसूताः ॥५॥

तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च । संवत्सरं च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः ॥६॥

तस्माच्च देवा बहुधा सम्प्रसूताः साध्या मनुष्याः पशवो वयांसि । प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥७॥

सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषः समिधः सप्त होमाः । सप्त इमे लोका येषु चरन्ति प्राणा गृहाशया निहिताः सप्त सप्त ॥८॥

अतः समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः । अतश्च सर्वा ओषधयो रसश्च येनैष भूतैस्तिष्ठते ह्यन्तरात्मा ॥९॥

पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम् । एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम ॥१०॥

मुण्डकोपनिषदि २ । १ ॥

Chapter IX.

The External Form and Content of the Vedas.

Sāmavēda II, 21, 7.

(१०७) ओ३म् ॥ नमः सखिभ्यः पूर्वसद्भ्यो नमः साकंनिषेभ्यः । युञ्जे वाचꣳ शतपदीम् ॥१॥

पदपाठः—नमः । सऽखिभ्यः । पूर्वऽसद्भ्यः । नमः । साकम्ऽनिषेभ्यः । युञ्जे । वाचम् । शतऽपदीम् ॥

अन्वयः—पूर्वसद्भ्यः सखिभ्यः नमः, साकंनिषेभ्यः सखिभ्यः नमः । अहम् शतपदीम् वाचम् युञ्जे ॥

Word-meaning &c:—सखिभ्यः=to friends **पूर्वसद्भ्यः** (पूर्वम् पूर्वस्मिन् दिशायां वा सीदतीति पूर्व+√षद्लृ+क्विप् P. III, 2, 61) =that have been already seated; those who are sitting towards the east or in the front. **साकंनिषेभ्यः** (साकं+नि+√षद्लृ+ड P. III, 4, 96)=that are sitting in company with. **युञ्जे**=I use. वाचम्=speech; the Vedic speech. **शतपदीम्** (शतं पादाः यस्याः सा शत+√पद+क्विप्+ङीप् P. IV, 1, 8,=of hundred feet; rich in vocabulary and metres.

Translation:—(The person who has just arrived at the assembly says:—) Salute to those friends that have already been sitting at the assembly and salute also to those that are sitting with me. (With your permission) I sing the (splendid) Vedic poetry that is rich in vocabulary and metres.

Comment:—This is the opening of a Vedic Assembly held according to the principles laid down

in the famous Saṁjñāna sūkta, Ṛgvēda X, 71. This stanza describes the external form of the Vedas. The Vedic style is essentially poetical, rich in vocabulory and metres, and full of figures of speech.

३ १र २र ३ १ २ ३ १ २ ३ १ २
(१०८) युञ्जे वाचꣳ शतपदीं गाये सहस्रवर्तनि ।
३ १र २र ३ १ २
गायत्रं त्रैष्टुभं जगत् ॥२॥

१ २र ३ १ २ १ २र ३ १ २ ३
पदपाठः—युञ्जे । वाचम् । शतऽपदीम् । गाये । सहस्रऽवर्तनि ।
२ १ २ १ २र
गायऽत्रम् । त्रैऽस्तुभम् । जगत् ॥

अन्वयः—अहम् शतपदीम् वाचम् युञ्जे, सहस्रवर्तनि गायत्रम्, त्रैष्टुभम्, जगत् च गाये ॥

Word-meaning &c :—गाये=I sing. सहस्रवर्तनि (सहस्रेषु वर्तनिषु सहस्र+√वृतु+अनि U. II, 106)=in a thousand ways. गायत्रम् (√गै+युक्+अत्रन् U. III, 105 and P. VII, 3, 33; गायत्रं गायतेः स्तुतिकर्मणः । निरुक्ते १ । ८ ॥ or √गै+शतृ+√त्रै पालने+क P. III, 2, 3)=the metre called gāyatrī; God the Protector of His devotee. त्रैष्टुभम् (त्रि+√ष्टुभ निरोधे+क्विप्+अण् P. III, 2, 177 and V, 4, 38)=the triṣṭubh metre. जगत् (√गम्लृ+अति U. II, 84)=the jagatī metre.

Translation:—I use charming Vedic poetry rich in phraseology singing it in a thousand ways, as it is adorned in innumerable metres like the gāyatrī, the triṣṭubh, the jagatī &c.

Comment:—The expression 'śatapadīm' is explained in this verse. The external form of Vedic poetry is clearly described here by the words 'sahasravartani', 'gāyatram', 'trāiṣṭubhaṃ' and 'jagat'. The Vedic psalms or hymns—whatever they may be called—can be sung in various ways. At the head of most of the chapters in this book the metre as well as the key has been mentioned. The names of the three metres in the stanza include by implication all the other metres as well.

"The gāyatrī usually consists of twenty-four syllables, variously arranged, but generally as a triplet of three Pādas (=feet or quarters) of eight syllables each, or in one line of sixteen syllables and a second line of eight. There are eleven varieties of this metre, and the number of syllables in the stanza varies accordingly from nineteen to thirtythree syllables. The jagatī consists of fortyeight syllables arranged in four Pādas of twelve syllables each, two Pādas forming a line or hemistich. The Triṣṭubh consists of four Pādas of eleven syllables each."*

(१०६) गायत्रं त्रैष्टुभं जगद्विश्वा रूपाणि संभृता ।
देवा ओकाꣳसि चक्रिरे ॥३॥

पदपाठः—गायत्रम् । त्रैऽस्तुभम् । जगत् । विश्वा । रूपाणि ।
सम्ऽभृता । देवाः । ओकांसि चक्रिरे ॥

अन्वयः - विश्वा रूपाणि संभृता गायत्रं त्रैष्टुभं जगत् देवाः ओकांसि चक्रिरे ॥

Word-meaning &c.:—विश्वा=all. रूपाणि=forms. संभृता =assuming; putting on. देवाः=all beneficial objects. ओकांसि=(√अव+कक् U. III, 41 or कु U. IV, 216)=abodes. चक्रिरे=have made. देवा ओकांसि चक्रिरे=in which all beneficial objects and laws are clearly and infallibly described.

Translation:—This poetry of the Holy Vedas dressed in its innumerable forms of the gāyatrī, triṣṭubh, jagatī and other metres, contains a clear and faultless account of all objects and laws beneficial to humanity.

* Griffith in his Translation of the Ṛgvēda.

Comment:—In this stanza the inner content or subject matter of the Vedas is mentioned. They are the refuge or abode (ओकस्), so to say, of all beneficent things. At the time of the dissolution of the world, the norm or standard of the being and essential features of all created things subsists only in the Vedas—Divine Knowledge—the Knowledge of God. It is in the Mind of the Supreme Being that the form, nature and differentia of each created object has its true specimen, and when the period of the great dissolution (महाप्रलय) is over, this Divine Knowledge serves as a guide for material creation. R. V. I, 164, 39 states the same fact but with greater force as follows: "All Vedic statements (ऋचः) have their denotation in the Most High (परमे), Imperishable (अक्षरे), Omnipresent God (व्योमन्), in Whom (यस्मिन्) all beneficent beings and objects (विश्वे देवाः) have their refuge (अधि निषेदुः). What profit (किम्) can that man derive (करिष्यति) from the Vedas (ऋचा) who (यः) does not realise (न वेद) the Supreme Being (तत्) [but blindly studies the Sacred Text] ? [But on the other hand] all these beneficent agents (ते इमे) fully resort (समासते) only (इत्) to them who (ये) realise (विदुः) that Supreme Being (तत्) [in their Vedic studies]."*

Manu also says that "it is from the Vedic Law itself that the Supreme Being in the beginning, severally fashioned different institutions assigning different names and walks in life to different beings."†

* ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ऋ० १ । १६४ । ३९ ॥

† सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥ म० १ । २१ ॥

Similarly in the Vedānta Sūtra I, 3, 28 we have the following aphorism शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् on which Śaṃkarācārya remarks:—अतः प्रभवात् ।

अत एव हि वैदिकाच्छब्दाद्देवादिकं जगत्प्रभवति । ननु 'जन्माद्यस्य यतः' (१ । १ । २) इत्यत्र ब्रह्मप्रभवत्वं जगतोऽवधारितं कथमिह शब्दप्रभवत्व-मुच्यते । अपि च यदि नाम वैदिकाच्छब्दादस्य प्रभवोऽभ्युपगतः कथमेता-वता विरोधः शब्दे परिहृतो यावता वसवो रुद्रा आदित्या विश्वेदेवा मरुत इत्येतेऽर्थाः अनित्या एवोत्पत्तिमत्त्वात् । तदनित्यत्वे च तद्वाचिनां वैदिकानां वस्वादिशब्दानामनित्यत्वं केन निवार्यते । प्रसिद्धं हि लोके देवदत्तस्य पुत्र उत्पन्ने यज्ञदत्त इति तस्य नाम क्रियत इति । तस्माद्विरोध एव शब्द इति चेत् । न । गवादिशब्दार्थ सम्बन्धनित्यत्वदर्शनात् । नहि गवादिव्यक्तीना-मुत्पत्तिमत्त्वे तदाकृतीनामप्युत्पत्तिमत्त्वं स्यात् । द्रव्यगुणकर्मणां हि व्यक्तय एवोत्पद्यन्ते नाकृतयः । आकृतिभिश्च शब्दानां सम्बन्धो न व्यक्तिभिः ।

× × × × ×

स्थिते वाचकात्मना नित्ये शब्दे नित्यार्थसम्बन्धिनि शब्दव्यवहारयोग्या-र्थव्यक्तिनिष्पत्तिरतः प्रभव इत्युच्यते ॥ ब्रह्मसूत्रशांकरभाष्य Nirṇaya Sagara edition p. 122, 123.

Chapter X,

Glorification of God and Prayer for Prosperity.

Sāmavēda II, 397-406.

Seer:—Hiraṇyastūpa.

Subject:—Glorification of and supplication for prosperity to, God the Most Holy, Generator of all.

Metre:—Stanzas 1, 3, 4 and 10 gāyatrī; 2, 5, 8 and 9 nicṛd-gāyatrī, 6 and 7 virāḍ-gāyatrī.

(११०) ओ३म् ॥ सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस्कृधि ॥१॥

पदपाठः—सन । च । सोम । जेषि । च । पवमान । महि । श्रवः । अथ । नः । वस्यसः । कृधि ॥

अन्वयः—हे सोम पवमान त्वं शत्रून्सर्वदा जेषि तवैव महि श्रवश्च । अथ च नो धनं सन नो वस्यसः कृधीति प्रार्थयामहे ॥

Word-meaning &c.:—सन=give (wealth &c.). सोम Oh Most Loving Lord ! जेषि=Thou dost always overcome Thy antagonists or the wicked. पवमान=Most Holy; sanctifying others; Holy and Sanctifying Thy devotees. महि=great. श्रवः=glory. अथ=hence; therefore. वस्यसः(√वस्+तृच्+ईयसुन् P. V, 3, 59 and VI, 4, 154)=dwelling most happily; happy; most or very happy.

Translation:—Oh Most Loving and Gentle God! Thou dost always put down the wicked, and Thine is all Greatness and Glory. Bestow on us, we beseech Thee, wealth, great peace and happiness in life.

Purport:—God, to Whom alone real greatness and glory belongs and Who is always victorious over wickedness, has all at His Omnipotent disposal. He confers on the devotee prosperity and liberation according to the latter's deserts. Hence every man or woman should endeavour to grow better and better spiritually day by day, in the sight of God.

(१११) सना ज्योतिः सना स्वाऽ३ऽर्विश्वा च सोम सौभगा । अथा नो वस्यसस्कृधि ॥२॥

पदपाठः—सन । ज्योतिः । सन । स्वः । विश्वा । च । सोम । अथ । नः । वस्यसः । कृधि ॥

अन्वयः—हे सोम नो ज्योतिः स्वो विश्वा च सौभगा सन । अथ नो वस्यसः कृधि ॥

Word-meaning &c.:—**ज्योतिः**=light (to see and grasp matters spiritual and other difficult affairs where ordinary worldly intelligence is of no use). **स्वर्**= heaven i. e., heavenly happiness (the highest happiness in mundane life is meant here); Divine Lustre or Splendour. **सना ज्योतिः सना स्वः**=give us light to see Thy Divine Splendour. **सौभगा (सुभग+अञ्** P. V, 1, 129; =**सौभगानि** VII, 1, 39)=things that bring prosperity.

Translation:—Oh Most Bountiful Lord! give us light that we may see Thy splendour (in every thing), bestow on us all that is required to make us prosper in the world and make our life peaceful and happy.

Purport:—God is ever Pure, Wise and Happy. It is only by resorting to Him that we shall become enlightened and secure true happiness.

(११२) सना दक्षमुत क्रतुमप सोम मृधो जहि ।
अथा नो वस्यसस्कृधि ॥३॥

पदपाठः—सन । दक्षम् । उत । क्रतुम् । अप । सोम । मृधः । जहि । अथ । नः । वस्यसः । कृधि ॥

अन्वयः—हे सोम ! नो दक्षमुत क्रतुं धेहि, मृधोऽप जहयथ नो वस्यसः कृधि ॥

Word-meaning &c.:—दक्षम् (√दक्ष वृद्धौ+अच्; Nig. II, 9)=cleverness, intelligence, dexterity, strength. क्रतुम् (√डुकृञ् करणे+कतु U. I, 76 Nig. II, 1)=power or strength to work; perseverance in our duties. मृधः (√मृध हिंसायाम्+क्विप्; Nir. VII, 2)=enemies (like lust anger and other passions). जहि=destroy.

Translation:—Oh Most Generous God ! confer on us the intelligence and strength to do our duty in life, crush all our foes in the shape of lust, anger and other passions and bestow on us great peace and happiness.

Purport:—Our worst enemies are our passions which have first to be disposed of if we have to succeed in life. To expel them is possible only through the grace of God Who gives to His devotees all the strength required to combat them. What is most essential in the fight for us is our pursuance of our duty with right understanding and perseverance.

(११३) पवीतारः पुनीतन सोममिन्द्राय पातवे ।
अथा नो वस्यसस्कृधि ॥४॥

पदपाठः—पवीतारः । पुनीत । न । सोमम् । इन्द्राय । पातवे । अथ । नः । वस्यसः । कृधि ॥

अन्वयः—हे पवीतारो यूयमिन्द्राय पातवे नो जीवनम्पूनीत न । अथ नो वस्यसः कृधि ॥

Word-meaning &c.:—पवितारः (√पू+तृच्)=the wise who cleanse the hearts of others by good advice. पुनीत =purify, cleanse. न = expletive of certainty. सोमम्= gentle; brimming with gentleness and love for all, इन्द्राय=for Almighty God. पातवे (√पा पाने+तवेन् P. III, 4, 9)=that it may be acceptable to.

Translation:—Oh wise men ! who by your guidance cleanse the hearts of men, please do purify our lives and render them loving towards all so that we may be acceptible to the Lord Almighty. Make us worthy of the highest happiness.

Purport:—At the time of initiation or the solemn observance of any rite, the man, learned in the Vedas and of a virtuous life, should, at the very outset advise the principal person concerned and also all that are assembled, about the Loving, Peaceful and Gentle Nature of God, then about worldly prosperity and liberation, thus enabling them to see their way in life so as to become most acceptable to God.

(११४) त्वꣳसूर्ये न आ भज तव क्रत्वा तवोतिभिः । अथा नो वस्यसस्कृधि ॥५॥

पदपाठः—त्वम् । सूर्ये । नः । आ । भज । तव । क्रत्वा । तव । ऊतिऽभिः । अथ । नः । वस्यसः । कृधिं ॥

अन्वयः—हे सोम ! त्वं तव क्रत्वा तवोतिभिर्नः सूर्य आभज । अथ नो वस्यसः कृधि ॥

Word-meaning &c.:—सूर्ये*=in the sun; when men are engaged in work; when the sun rises; at day; आ भज resort or come to us; make us approach Thee. क्रत्वा= by religious or philanthropic work. (√अव रक्षण &c.+ क्तिन् P. III, 3, 97 & VI, 4, 20)=acts of protection from various dangers.

Translation:—Oh Most Generous God, protect us from all dangers and give us the right impulse when we go about our duties on sunrise thus leading us to highest happiness in life.

Purport:—In his daily duties man should seek, in his remembrance of God, protection from various dangers and Divine impulse to be always in the right. This attitude is a great source of happiness.

(११५) तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् ।
अथा नो वस्यसस्कृधि ॥६॥

पदपाठः—तव । क्रत्वा । तव । ऊतिभिः । ज्योक् । पश्येम । सूर्यम् । अथ । नः । वस्यसः । कृधि ॥

अन्वयः—हे परमात्मँस्तव क्रत्वा, तवोतिभिर्वयञ्ज्योक्सूर्यम्पश्येम । अथ नो वस्यसः कृधि ॥

Word-meaning &c.:—ज्योक्=long.

Translation:—Oh Most Loving God, may we, by Thy impulse, and through Thy acts of protection from all sides, see many days of active life, so bless Thou us with peace and happiness.

---

*The word सूर्यं according to P. III, 1, 114, is derived either from √सृ or √सु by adding the suffix क्यप् which after √सु will take the augment रुट्, (√सृ+क्यप् or सु+रुट+क्यप्), the latter meaning that which prevails upon man to work. All begin to work when the sun rises. Hence सूर्यं in the present stanza means also when we go about our duties on sunrise. (Vide Mahābhāṣya, III, 1, 6 on P. III, 1, 114).

Purport:—Man can attain long life only by active, peaceful and innocent life. This should be the ideal for all who wish to live long. Any other way of living is a bane to humanity.

**(११६) अभ्यर्ष स्वायुध सोम द्विबर्हसं॑ रयिम् ।
अथा नो वस्यसस्कृधि ॥७॥**

पदपाठः—अभि । अर्ष । सुऽआयुध । सोम । द्विऽबर्हसम् । रयिम् । अथ । नः । वस्यसः । कृधि ॥

अन्वयः—हे स्वायुध सोम ! द्विबर्हसं रयिमस्मभ्यमभ्यर्ष । अथ नो वस्यसः कृधि ॥

Word-meaning &c.:—अभ्यर्ष=confer on (us). स्वायुध (सु+आ+√युध्+अच्)=Who helps to fight well (enemies like lust, anger &c.). सोम (√सु+मन् U. I, 140)=Creator. द्विबर्हसम् (द्वयोः स्थानयोः परिवृढः द्वि+√बृह+असि U. IV, 227; Nir. VI, 17)=exalted in two places—the earth and the heaven; in both lives, before death and after. वस्यसः= most joyful and rejoicing.

Translation:—Oh Lord God, Creator of the universe ! Thou Who helpest us to fight well all enemies, lead us to that happiness which is exalted both here and hereafter and so bless us with the greatest joy.

Purport:—Man's aim should be the highest happiness whatever may the odds be in the way of attaining it. The means to fight and overcome all difficulties is by peacefully attending to our duty feeling the presence of God wherever we may be.

(११७) अभ्य३ऽर्षानपच्युतो वाजिन्त्समत्सु सासहिः । अथा नो वस्यसस्कृधि ॥८॥

पदपाठः—अभि । अर्ष । अनु । अपच्युत । वाजिन् । स । मत्सु । ससहिः । नः । वस्यसः॥* । कृधि ॥

अन्वयः—हे सोम त्वमनपच्युतः ससहिरस्यथ नो रयिमभ्यर्ष नः समत्सु वस्यसः कृधि ॥

Word-meaning &c. :—अनपच्युतः=unconquerable. अभ्यर्ष (अभि+√ऋषी गतौ)=succour us. समत्सु (सम्+√अद भक्षणे or सम्+√मदी हर्षे+क्विप् P. III, 2, 178 ; Nig. II, 17). *=in battles ससहिः (√षह मर्षणे+कि P. III, 2, 171, Vārtika सासहिवावहिचाचलिपापतीनां निपातनम् Vide Mahābhāṣya) =Who overcomes His foes. वस्यसः=victorious. वाजिन्= most powerful.

Translation:—Oh Most Powerful God, Thou art unquerable and ever vanquishest the antagonist; give us wealth and make us victorious on our foes in our battles.

Purport:—God supports the just and helps them subdue their foes, but He is ever opposed to the wicked whom He subdues.

(११८) त्वां यज्ञैरवीवृधन्पवमान विधर्मणि । अथा नो वस्यसस्कृधि ॥६॥

पदपाठः—त्वाम् । यज्ञैः । अवीवृधन् । पवमान । विऽधर्मणि । अथ । नः । वस्यसः । कृधि ॥

अन्वयः—हे पवमान सोमोपासकास्त्वां यज्ञैरवीवृधन् । स त्वम् नो विधर्मणि रक्ष । अथ नो वस्यसः कृधि ॥

Word-meaning &c. :—यज्ञैः=by such religious duties as worship &c. अवीवृधन्=establish, glorify. पवमान (√पूङ् पवने+शानच् P. III, 2, 18 and VII, 2, 82)=Who sanctifies

* समदः समदो वाऽत्तेः । सम्मदो वा मदतेः ॥ नि० ६ । १७ ॥ This word is used only in the plural.

or purifies. विधर्मणि (वगतः धर्मः यस्मात P. II. 2, 24 and V. 4, 124)=sinful things. वस्यसः=full of joy. उपासकाः (उप+√आस उपवेशने+ण्वुल् P. III, 1, 133)=the devotees. रक्ष=protect (us).

Translation:—Oh Most Holy God the Sanctifier of all ! Thy devotees glorify Thee by acts of piety. Do Thou protect us amidst sinful things, so that we may always rejoice.

Purport:—The devotee must take care that he does not forget his lofty spiritual aim in the midst of impure and sinful surroundings. It is better to shift oneself from such either bodily or mentally as necessary and keep the goal always in sight. Therefore company to be consorted with, books to be read and work to be done should always be scrutinised and seen whether they agree with one's goal or not, and anything contrary should always be decisively rejected. This is the way to grow in spiritual life and requires an assiduous practice of the presence of God.

३ १ २ ३ २ ३ २ ३ १ २ ३ २ ३ १
(११६) रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा
२ १ २ ३ १ २
भर । अथा नो वस्यसस्कृधि ॥१०॥

३२ ३ २ ३ १२ १ २र ३ २
पदपाठः—रयिम् । नः । चित्रम् । अश्विनम् । इन्दो । विश्व ऽ
३ २ ३ १२ ३ १ २र ३
आयुम् । आ । भर । अथ । नः । वस्यसः । कृधि ॥

अन्वयः—हे इन्दो ! नश्चित्रमश्विनं, विश्वायुं रयिमाभर । अथ नो वस्यसः कृधि ॥

Word-meaning &c.:—चित्रम् (√चिञ् चयने+क्त U. IV, 164)=various types of. अश्विनम्=vast, enormous. विश्वायुम् (विश्वम् आयुः यस्य यद्वा विश्वम् आयुः येन साधनेन जीव्यते तत्)=lasting for or enabling one to enjoy the full span of life. इन्दो =Most Opulent God ! आ भर=fully bestow on us.

Translation:—Oh Most Opulent God ! bestow on us, we beseech Thee, wealth of various types, vast and lasting a lifetime, and thus help us enjoy true happiness in life.

Purport:—Money, lands and cattle are worldly possessions which enable a man to be called rich. Good offspring also is a blessing. Good education, moral and spiritual advancement are other and higher types of wealth. On one side the endeavour of man and on the other the bestowal of them by God according to man's deserts, are the factors essential for its acquisition. Hence it is the duty of every man or woman to try to acquire them by all just and righteous means.

Prayers and Exhortations.

ओ३म् ॥ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम् ॥ दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायताम् ॥ निकामे निकामे नः पर्जन्यो वर्षतु । फलवत्यो न ओषधयः पच्यन्ताम् ॥ योगक्षेमो नः कल्पताम् ॥ यजुर्वेदे २२, २२ ॥

"Oh Great God ! let there be born in our kingdom men devoted to learning and teaching full of spiritual splendour; let there be born warriors skilled in military enterprise, heroic in spirit, masters of the science of military weapons and mighty fighters who can totally vanquish the enemy; let there be born cows giving abundant milk, oxen, carriers of heavy loads, and horses of high speed; women skilled in various industries, and may the son of Thy devotee shine in the assembly of the great while he attains his youth, may he be a heroic, all-conquering and a good wielder of the war chariot. May the clouds rain on every required occasion may the fruit-bearing trees bear for us ripe fruit in abundance and may the power of acquiring and preserving property ever remain with us."

न पापासो मनामहे नारायासो न जह्लवः ।
यदिन्न्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै ॥
ऋ० ८ । ६१ । ११ ॥

"We do not approach Almighty God, the Dispenser of all good, being ourselves steeped in sin, void of charity and doing no righteous works; (but we have to our credit a life of purity, charity and pious works), wherefore only it is that we now make the Lord God Almighty our Friend by all joining together in good deeds."

प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु । प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ॥ अथर्व० १६; ६२ ॥

"Oh Lord God Almighty, grant me such qualities of head and heart as would endear me to the enlightened and learned among us, to the ruling class and to all men that have eyes to see whether agriculturist and trader or artizan and labourer".

रुचं नो धेहि ब्राह्मणेषु रुचꣳराजसु नस्कृधि । रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥ य० १८, ४८ ॥

"Oh Lord of the universe! impart, we beseech Thee. out of Thy refulgence, lustre to those of us that are devoted to learning and contemplation of Thee; bestow on our rulers amiability of disposition, on our commercial and agricultural, artizan and labouring classes light; and enlighten me also with a ray of Thy splendour".

यत्र ब्रह्मविदो यान्ति दीक्षया तपसा सह । ब्रह्मा मा तत्र नयतु ब्रह्मा ब्रह्म दधातु मे । ब्रह्मणे स्वाहा ॥ अ० १९ । ४३ । ८ ॥

"May the Supreme Lord bestow on me the knowledge of His Eternal Vedas and lead me into that bliss into which the knowers of God and His Law enter by a regulated and mortified life. Glory be to God Almighty".

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु ॥ ऋ० ८ । ९५ । ७ ॥

Come (brethren), let us, now, with the singing of the Sāmavēda and the chant of the Ṛgvēda both correct in pronunciation and accent, propitiate the Lord God the Bestower of all good, Whose Glory is always on the increase, and Who is capable of imparting bliss to us. May He make us happy !"

अरं त इन्द्र श्रवसे गमेम शूर त्वावतः । अरꣳ शक्र परेमणि ॥ सा० २ । २०९ ॥

"Oh Strong and Omnipresent God ! Vouchsafe, we beseech Thee, the grace to approach Thee always and everywhere in Thy Glory—Thee, Who hast no equal—and under all circumstances to take refuge in Thee."

विश्वतोदावन्विश्वतो न आ भर । यं त्वा शविष्ठमीमहे ॥ सा० १ । ४३७ ॥

Oh Lord God ! Who conferest benefits on Thy devotees from all round, support us from all directions we beseech Thee Who art the Most Powerful."

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ २ ३र २र
अग्ने विवस्वदा भरास्मभ्यमूतये महे । देवोह्यसि
३ २
नो दृशे ॥ सा० १ । १० ॥

"Oh Most Refulgent God ! Vouchsafe, we beseech Thee, that we may accomplish such religious and philanthropic works as would confer on us perfect safety (in life), for Thou art Illuminator with Whose light we are able to percieve with our senses (and realise the truth)."

द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ य० ३६ । १७ ॥

"Oh Lord ! May there be peace in the celestial regions, may there be peace in the intermediate regions, may there be peace on earth ; may the waters be appeasing, may herbs be wholesome and may trees and plants bring peace to all; may all beneficent beings bring peace to us, may the Vedic Law propagate peace all through the world. May all things be a source of peace to us and let peace itself bestow peace on all and may that peace come to me also".

॥ ॐ ॥ शान्तिः । शान्तिः । शान्तिः ॥ ॐ ॥

"May there be peace to all from external material objects, may there be peace from our own selves, may there be peace from Divine Wrath".

APPENDIX I.

Index to the first lines of Vedic verses and other matter.

In this index short quotations from the Brāhmaṇas and Upaniṣads as well as partial quotations from other sources are not included. The bold print in this appendix refers to the principal Vedic verses, the middling, to those Vedic stanzas that have either been translated or simply quoted. The small type indicates statements from other sources such as the Upaniṣads, Mahābhārāta &c. Figures within brackets are the serial numbers of verses in the book and those outside refer to pages.

अ

आ

इ

उ

ऋ

ए

ऐ

ओ

क

ग

च

ज

त

द

ध

न

प

ब

भ

म

य

र

व

श

स

END OF VOLUME I.

THE RAMLAL KAPUR TRUST'S
OTHER PUBLICATIONS.

Other books published by the Ramlal Kapur Trust, Anarkali, Lahore are :—

1. The Āryābhivinaya of Maharṣi Dayānanda Sarasvatī. This is a critical edition with useful footnotes edited by P. Vācaspati, M. A., B. Sc.

2. The Vedic Twilight Prayers—'Saṃdhyā' with interpretation by Maharṣī Dayānanda Sarasvatī. Critically edited by P. Brahmadatta Jijñāsu.

3. The Pañcamahāyajñavidhi of Maharṣi Dayānanda Sarasvatī. As per No 2 above.

4. The Vākyapadīya of Bhartṛhari with the author's own scholion elucidated by a commentary by Vṛṣabhadēva. Critically edited by P. Charudēva Śāstri M. A., M. O. L., Professor, D. A. V. College, Lahore.

To be had of **Messrs. Ram Lal Kapur & Sons,** Paper Merchants and Stationers, Anarkali, Lahore or their branches at Sadar Bazar, Ambala Cantonment; Guru Bazar, Amritsar and Bunder Road, Karachi and also of all Sanskrit and Vedic booksellers.

N. B.—The price of this book is Rs. 1/12, the cloth-bound and 1/8 ordinary edition, in India. Where Indian currency is not in force the price will be worked out on the basis of one shilling and six pence to the rupee. Postage Extra.